
# ॥ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ॥



Tracking:

| sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 19/08/2019 | Typing started on | H K Srinivasa Rao |
| 2 | 24/08/2017 | Typing Ended on | H K Srinivasa Rao |
| 3 | 02/09/2017 | First Proof Reading | H K Srinivasa Rao & MS Venugopal |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa"s Philosophy.*

*With great humility, wesolicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despitegreat care.We would be pleased to incorporate such corrections in the next versions.Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K sRINIVAsA RAO, N 26, 2ND FLOOR, 15TH CROss, NEAR VIDHYAPEETA CIRCLE, AsHOKANAGAR, BANGALORE 565. PH NO. 26615951, 9901971176, 8095551774, Email :***srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ,ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ"

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಆಶ್ಚರ್ಯಜನಕವಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಬೇಕಾಗಿ ಕೋರುತ್ತೇವೆ.

ಗ್ರಂಥ ಋಣ:ಸಾರೋದ್ಧಾರ ಪ್ರಕಾಶನ-ಶ್ರೀನಗರ-ಬೆಂಗಳೂರು ಇವರಿಂದ ಪ್ರಕಾಶಿತವಾದ - ಶ್ರೀರಘುಪ್ರವೀರತೀರ್ಥಕೃತಂ - ಶ್ರೀಮದ್ವ್ಯಾಖ್ಯಾನಾಖ್ಯಾನ ಪ್ರಾಮಾಣ್ಯ ಪ್ರಬೋಧನಮ್.

॥ ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ॥ ........ 1

श्रीमद्वृन्दावनाख्यान प्रामाण्यप्रबोधनम् ........ 4

# श्रीमद्वृन्दावनाख्यान प्रामाण्यप्रबोधनम्

श्रीमद्दशप्रमतिहृन्नभसि स्फुरन्तं श्रीरामचन्द्रमहमन्वहमानतोऽस्मि।

श्रीवादिराजकुमुदं प्रतिनन्दयन्तं श्रीवाजिवक्तनुमप्रतिमंश्रितोऽस्मि॥1॥

श्रीमदानन्दतीर्थार्यकरुणारसबिन्दवः।

पापानल सुसन्तप्तं क्लेदयन्तु पुनन्तु माम्॥2॥

श्रीवादिराजगुरुवायुमिमं महान्तं सद्युक्तिवृन्दतुहिनैश्च मुदं नयन्तम्।

दुर्युक्तिपांसुपटलं च समुत्क्षिपन्तं सेवे हयास्यनभसिह्यपि सञ्चरन्तम्॥3॥

वृन्दावनाचार्यपादपद्मं हृदि सुबुद्धिदम्।

स्मृत्वा वृन्दावनाख्यान प्रामाण्यं बोधयाम्यहम्॥4॥

'श्रीमद्वृन्दावनाख्यानं प्रमाणं, आप्तवाक्यत्वात्, सम्प्रतिपन्नभाष्यवदित्यनुमानेन वृन्दावनाख्यानस्य प्रामाण्यमवगन्तव्यम्'॥

"न चासिद्धिः। इदमाप्तवाक्यं वक्राद्यानुकूल्योपेतत्वात् सम्प्रतिपन्नवत् इत्यनुमानेनाप्तवाक्यता सिद्धेः। अत्र अनुमानद्वयस्य प्रयोजनं जिज्ञासादिकरणसुधायां 'आप्तवाक्यतयातेन' इत्यनुभाष्यव्याख्यानाऽवसरे प्रोक्तमनुसन्धेयम्"।

न च वाच्यं वक्रद्यानुकूल्यस्यैवाभावादाप्तवाक्य(ताऽ)त्वासिद्धेः न प्रामाण्यमिति। अत्र वक्रानुकूल्यं हि विवक्षितार्थ तत्वज्ञानं, करणपाटवं, विवक्षाचेति त्रयम्। इदं चैतद् वक्तृभूतलक्षाभरणाद्यनेकग्रन्थकर्तृ सर्वज्ञशिरोमणि श्रीमद्वादिराजगुरुचरणानां सर्वसम्मतमस्त्येव। न च तत् (कृतत्वे) कर्तृत्वे विवादः तत्कृतत्वप्रसिद्धिमत्वात्। किञ्चैतद् ग्रन्थस्थानां केषाञ्चित् पद्यविशेषाणां तदानीन्तनैः गुरुराजकृता इति श्रीवृन्दावनाग्रे शिलायां लेखनात्। विशिष्टग्रन्थस्यापि तदारभ्य तन्मठीयैरन्यमठीयैश्च श्रीगुरुराजकृता इति सङ्गृहीतत्वाच्च। तद्ग्रन्थोद्धृतमन्त्रविशेषस्य श्रीगुरुराजोद्धृत इति परम्परोपदेशः चाध्यक्षसिद्धः। तेनापि जानीम अयं ग्रन्तः तत्कृत इति।

एवमनङ्गीकारे श्रीमद्भाष्यादेरपि श्रीमदाचार्यकृतत्ववर्णनमशक्यं स्यात्। तथा च सोधापुरस्थ श्रीमद्वृन्दावनान्तर्गतब्राह्मणस्वप्नमूर्तिश्रीगुरुराजैः कृतमिति वक्रानुकूल्योपेतमिति।

श्रोत्रानुकूल्यं हि तत्वज्ञानयोग्यत्वं वक्तुः प्रेमास्पदत्वं चेति द्वयम्। अस्य चाप्रत्यक्षत्वेन तदभावस्याप्यप्रत्यक्षत्वात् तदभावसाधकप्रमाणान्तराभावाच्चैतच्छ्रोतृभूतस्वप्नद्रष्टृ ब्राह्मणादीनां निश्चितमस्त्येवेत्यतः श्रोत्रानुकूल्योपेतमिदमिति॥

प्रसङ्गानुकूल्यं हि श्रोतृप्रयोजनोद्देश्यत्वम्, तच्च श्रोतृभूतस्वप्नद्रष्टृ ब्राह्मणादीनां प्रसक्तानिष्टनिवृत्ति-पूर्वकमैहिकामुष्मिक समस्तेष्टप्राप्त्यर्थं कर्तव्यज्ञातव्यबोधनाय प्रवृत्तत्वादस्त्येवेति॥ तथा च वक्त्राद्यानुकूल्योपेतत्वादाप्तवाक्यतासिद्धेः प्रमाणमेवेदमिति।

किञ्चेदं प्रमाणं शास्त्रानुयायित्वात्तदविरोधित्वाच्च। यदित्थं तत्तथा यथा सम्प्रतिपन्नमित्यपि साधयितुं शक्यत्वात् प्रमाणमिति॥ अत्र शास्त्राविरोधित्वमात्रस्य नर्मादिवाक्ये व्यभिचारित्वात् श्रोतृप्रयोजनोद्देश्यत्वे सतीति ग्राह्यम्। शास्त्रानुयायित्वं तदविरोधित्वं चोत्तरत्र (प्रदर्शयिष्यामः) प्रतिपादयिष्यामः। ततो नासिद्धिः शङ्कनीया।

एतेन नेदमाख्यानं गुरुराजकृतं किन्तु केनचित् प्रतारकेण दैत्यस्वभावेन प्रयोजनान्तराभावेपि लोकवञ्चनाय कृतमिति कुचोद्यं निरस्तम्।

शास्त्रविरोधित्वे हि तत्स्यात्। प्रकृते च तदभावेन तदभावादिति ज्ञातव्यम्। किञ्चस्वप्नद्रष्टृब्राह्मणादयः न श्रोत्त्रानुकूल्योपेताः, सर्वज्ञकर्तृकशास्त्रविरुद्धार्थोपदेश विषयत्वात् यथा जिनादय इति श्रोत्रानुकूल्याभाव साधकानुमाने असिद्धिरप्यनेनोक्ता भवति। प्रत्युत स्वप्नद्रष्टृ ब्राह्मणादयः श्रोत्रानुकूल्योपेताः सर्वज्ञकर्तृकशास्त्र अविरुद्धार्थोपदेशविषयत्वाद्यथा शुकादय इत्यनुमाने असिद्धिरप्यनेन परास्तावेदितव्या।

एवं तर्ह्येतावत् कालपर्यन्तं सर्वैरपि तारकमिदमिति श्रीमद्भाष्यादिवत् कुतो न परिगृहीतमिति चेद्युच्यते।

तन्मठीयैः (अन्यैश्च) अन्यमठीयैश्चैतदाख्यानदृग्भिः सद्भिस्तथा सङ्गृहीतमेव। किञ्चैतदाख्यानगतानां प्रत्यहं पठना(पाठा)दिना सर्वेषामनायाससाध्यविशिष्टाख्यान-पठनाभावनिमित्तकाख्यानोक्तदोषनिवारणद्वारा महाफलप्रापकाणां वेदनिधिस्वामिभिः शिलायां लिखितानां केषाञ्चित् सारपद्यानां बहुदेशेषु विद्वद्भिः सङ्गृहीतत्वाच्च कथमपरिगृहीतमिति।

नन्वथापि विशिष्टंसर्वैरप्यपरिगृहीतं चेति विरुद्धमिति चेदस्तु।

उभयमपि को विरोधः विशिष्टत्वेपि श्रीमद्भाष्यादिवत् कैश्चिदलाभान्नसङ्गृहीतम्। लाभेपि वा

कैश्चित् योग्यताभावान्न-परिगृहीतमित्येतावता किं नः छिन्नमिति।

नन्वाख्यानस्य शास्त्रानुयायित्वात् तदविरुद्धत्वाच्छ प्रामाण्यमुक्तम्। तत्र शास्त्रानुयायित्वं च तत्प्रतिपाद्यार्थ प्रतिपादकत्वम्। तदविरुद्धत्वं तु तदविरुद्धार्थप्रतिपादकत्वं। आख्याने च को अर्थः प्रतिपाद्यते कथं च शास्त्रानुयायित्वं तदविरुद्धत्वं चेति चेदुच्यते॥ अत्र हि योग्यानां श्रीगुरुराजमहत्त्वज्ञानपूर्वकं तद्भजनादिना तदनुग्रहद्वारा हरिप्रसादेनाखिलपुरुषार्थसिद्ध्यर्थं श्रीगुरुराजानां ऋजुगणस्थत्वादि महामहिमा मुख्यतः प्रतिपाद्यते॥ अयमर्थश्च तात्पर्यनिर्णायकोपक्रमादिभिरागमार्था निर्णायकश्रुत्यादिभिश्चावगम्यते॥

तथा हि प्रथमाध्याये 'इन्द्रो रुद्रः कुबेरश्च यमो वरुण एवच। अग्निर्निर्ऋतिर्वायुश्च चन्द्रसूर्यादयो ग्रहाः॥1॥ देवोपदेव भूदेवा नरदेवाश्च सर्वशः॥ सकलत्राः सपुत्राश्च सर्वे सपरिवारकाः॥2॥ गीतावादित्रनृत्यैश्च जयशब्दपुरस्कृतैः। नानोपहारबलिभिः ब्रह्मघोषोपबृंहितैः॥3॥ उपासते हयग्रीवं वृन्दावनगतं सदा।' इत्यर्धाधिक श्लोकत्रयेण वृन्दावनसन्निहित श्रीगुरुराजेषु देवैर्विष्णुरुपास्यत इत्यर्थप्रतिपादकेन ऋजुत्वनिश्चायक विष्णुविशिष्टप्रतिमात्वरूपलिङ्गस्योपक्रमः। अस्य लिङ्गस्य 'विशिष्ट प्रतिमा वायुरेव' इति वाक्येन ऋजुधर्मत्वं निश्चितम्॥ द्वाविंशे अध्याये 'सुतसम्पूर्णकामस्य हयग्रीवाज्ञया मम। कामः कुत्रापि नास्त्येव पूर्णकामस्य का स्पृहा' इति ऋजुत्वनिर्णायक अकामत्वरूपलिङ्गोक्त्योपसंहारः॥

'ऋजुनामेक एवास्ति' इत्यनुव्याख्यानावतारिका सुधायां 'ऋजवः समीचीना निर्दोषा इत्यर्थान्तरं' इति ऋजूनां कामादि दोषराहित्योक्त्या प्रकाशसंहितोक्तरीत्याचाकामत्वस्य ऋजुलिङ्गत्वं ज्ञातव्यम्॥

एवं द्वितीये 'इन्द्रोपि सान्द्रसन्तोषादुपेन्द्रेण सहागतः। वृन्दावनगतं देवं चन्द्रवद्रञ्जनं दिशः॥1॥ नत्वा तस्मैस्तुतिं कृत्वा दत्वा तस्मै करं त्वरन्। श्रुत्वा तस्य कथामुक्त्वा वृत्रासुरवधं तथा॥2॥ विनिर्गतः पुनः स्वर्गं गुर्वग्निसहितः स्वराट्। गन्धेन चर्चितः चोग्रं दुर्गन्धं तेन वारयन्॥3॥ इत्थं चाग्निस्तिग्मतेजा मग्नश्चानन्दवारिधौ। भग्ने च यज्ञे कृत्ये च निर्माल्यं जग्मिवान् हरेः॥4॥

यमश्च यमुना भ्राता कमनीयं हरिं प्रति। रमापतिं मम स्वामिनं ननामागतः स्वयम्॥5॥ निवेद्य स्वाधिकारं तु दुर्जनां च बाधकम्। साधकं सिद्धधर्माणां सम्पदां तं प्रणम्य च॥6॥ जगाम निमिषेणायं स्वालयं कालयन्नरीन्। पालयन् शीलवृत्तानां त्याजयन् दुर्जनान् सुखात्॥7॥

वरूणो वायुना सार्धं लोकाधिपतिना गुणिन्। शरणं प्राप मद्वृन्दावने श्रीरमणं श्रुणु॥8॥ स्वाधिकारं निवेद्यास्मै गङ्गादार उदारधीः। सदारः प्रययौ धीरः सुधास्राव्यातपत्रगः॥9॥

कुबेरो नरवाहं च निर्ऋतिं त्वरया रयन्। गर्हयन् पुरतः शीघ्रमाससाद रमापतिम्॥10॥ स्वाधिकारं निवेद्यास्मै प्रसादं शिरसा धरन्। सदारः प्रययौ शीघ्रमुदारः स्वपुरं नरैः॥11॥

रुद्रोपि वीरभद्रेण शूद्रमोहनरूपिणा॥ काद्रवेयादिभिस्सार्धं द्रुतमायाद्रमापतिम्॥12॥ मद्वृन्दावन मध्यस्थं सद्वृन्दैरन्वितोनमत्। तद्वृन्दावनगं गोपं मद्वृन्दावन मध्यगम्॥ दृष्ट्वाच विस्मितो भूत्वा स्वनाथं राममेव च। अत्यन्तं स तु सन्दोषभरितो भरतो यथा॥14॥

बभूव स तु रुद्रोपि सरुद्रत्वं जहाविह। रूपान्तरेण कैलासं ययौ रूपान्तरेण च॥15॥ अत्राप्यन्तर्गतं रामं भजते निजसेवया। एवं सर्वेपि देवाश्चस्वस्वयोग्यं हरिं प्रभुम्॥16॥ भजन्ते निजसेवाभिर्भक्तिमन्तोत्र नान्यथा। इत्यनेन पूर्वाध्यायोक्त विष्णुविशिष्टप्रतिमात्वस्य विशिष्योक्तिः।

तृतीये 'यो मां देवं विजानाति ऋजुस्थं पुण्यकृन्नरः। सयाति निलयं (चालयं) पुण्यं यद्गत्वा न निवर्तते' इति श्रुत्युक्तिः। अनेन 'तत्पूर्वमस्य वंशे तु ऋजुस्थो हि सुरेश्वरः। वादिराजो यतिर्भूत्वा चैतत् विस्तारयिष्यति' इति ब्रह्माण्ड पुराणसमाख्या चोक्ता भवति॥

अस्मिन्नेव च अध्याये 'तेन च ब्रह्मणा साकं हरिमाराध्य भूरिषः। ताभ्यां महानुभावाभ्यां मुच्येहं कर्मबन्धनात्' इत्यनेन 'पूर्वं गिरिराजपतिमाराध्य' इत्यनेन गिरिपदप्रसक्तस्यात्र तेनेति परामृष्टस्य वायोर्ब्रह्मणश्चेत्येतयोरेव स्वकृतहरिपूजायां सहकारित्वरूपलिङ्गोक्तिः॥

कर्तृक्रियाजन्ययत्किञ्चित्फलशायिनः एवं हि सहकारित्वम्॥ तच्च गुरुराजकृत हरिपूजायां सहकारिणोः ब्रह्मवाय्वोः गुरुराजापेक्षयोत्तमत्वे 'स्वामिनः फलश्रुतेः' इति सूत्रानुसारेण पूर्णफलशालिनोः नोपपद्यते॥ तयोरवरत्वं तु सर्वप्रमाण विरुद्धम्। तस्मात् समानत्वमेव। साम्यन्तु ऋजूनामेवेत्यत ब्रह्मवायुसहकारित्वम् ऋजुत्वलिङ्गमेवेति। अत्र गुरुराजानां ब्रह्मत्वदशायां वायुना, वायुत्वदशायां ब्रह्मणा, इदानीं तु उभाभ्यां सह हर्याराधनं विवक्षितमिति न कश्चित् क्षुद्रोपद्रवः॥

चतुर्थे 'एवं सदासङ्घसुखैश्च संयुतो मुखैर्दुरापै-खंग-मुख्यदैवतैः' इति गरुडाद्यप्राप्यानेक विभववत्त्वरूपलिङ्गोक्तिः। तथा तत्रैव 'ब्रह्मणो दक्षिणांसं तु वायोः वामांसमेव च। गृह्य

सव्येतराभ्यां मे पाणिभ्यां संस्थितोऽभवम्॥1॥ ब्रह्मणो दक्षिणे कर्णे वायोः कर्णे तु वामके। संविदं तु करोम्यद्य विष्णोस्तत्वस्यनिर्णये' इति ब्रह्मवायुसखित्त्वरूपलिङ्गोक्तिः। पञ्चमे 'बहुरूपाणि धृत्वाहं सहभोगं तु दैवतैः। इह भुक्त्वा दिविस्थोपि सह मुच्ये विरिञ्चिना' इत्येनेनाहं बहुरूपाणि धृत्वेह दिविस्थोपि दैवतैर्विरञ्चिनासहभोगं भुक्त्वा पश्चात् सहभोगं तन्नामकं सत्यलोकाधिपत्यं च कृत्वा मुच्य इति सत्यलोकाधिपतित्व रूपलिङ्गकीर्तनम्॥ षष्ठे(अध्याये) 'मत्सन्निधाने सति नन्दनाग्र्य वृन्दावने सुन्दरमन्दाराभे। कन्दाशनेन्द्रैः सह चेन्द्रियेशो वीन्द्रादिदेवैः सह सन्निधत्ते'॥1॥'मयि गच्छति सत्पुत्र देवैः सह मुनीश्वरैः। परिगच्छति स्वच्छन्दोप्यनेकात्मसुमूर्तिभिः॥2॥ अन्वयव्यतिरेकानुविधायित्वेन तस्य मे। कस्य चेदृशमाहात्म्यं पश्यलोके सुचक्षुषा' इति श्रीहरिसन्निधान प्रयोजकीभूतसन्निधानवत्त्व लिङ्गोक्तिः॥ तत्रैव 'तवश्वासप्रणेताहं भविष्यामि न संशयः' इति श्वासप्रणेतृत्वरूपलिङ्गोक्तिः॥

सप्तमे 'व्यासोपि दासाय विशालबुद्धेः शशास मह्यं जगदीश दास्यं॥ सदा हयास्यं समुपास्य श्रीशं सेशं सशेषं जगदास दासं' इति शेषादिदासत्वरूप लिङ्गोक्तिः॥

अष्टमे 'ममापि जीवोत्तमत्वं श्रुत्वा सर्वे मम प्रियाः। गर्वं हित्वा प्रदास्यन्तु गुर्वन्तर्यामिणः करम्' इति जीवोत्तमत्वरूप लक्षणकथनम्॥ अस्मिन्ने(8)वाध्याये 'रथस्योपरि तिष्ठन्तमरुणो न्यरुणद्धि माम्। वरुणं प्रति गच्छन्तं चरणेन विना कृतः॥1॥ मात्रा भ्रात्रा विहीनोहं त्राता त्वं मम सर्वदा। यात्रां न कुरु चात्रापि तिष्ठ रूपान्तरेण च॥2॥ गरुडाग्रज इत्थं मामवदज्जरठाद्य च। इति तेनोक्त एवाहं कान्तरूपान्तरेण च॥3॥ वसामि वसुभिः साकं कश्यपात्मजपूजितः। वरुणोपि तदाह्वातुमागतो मां प्रति प्रिय॥4॥ कान्तरूपान्तरेणापि तद्गेहं गतवानहम्। यमोपि मां समाह्वातुं स्वयमेवागतो महान्॥5॥ कान्तरूपान्तरेणापि तद्गेहं गतवानहम्॥ इन्द्रोपि सान्द्रसन्तोषादुपेन्द्रस्याज्ञया प्रभुः॥6॥केन्द्रस्थानगते चन्द्रे मुनीन्द्रं मां समाह्वयत्। कान्तरूपान्तरेणापि तद्गेहं गतवानहम्॥7॥ तदैव मां समाह्वातुं धनदोपि समागतः। कान्तरूपान्तरेणापि तद्गेहं गतवानहम्॥8॥

तदैव शूली शिरसि त्रिशूली हर्ते गले सक्तनृरुण्डमाली। दलीकृतान्धश्च शिलीमुखेषु हालाहली गलमद्ये महात्मा॥9॥ आह्वायामास मां प्रीत्या मापतेः प्रियमुत्तमम्। कान्तरूपान्तरेणापि तद्गेहं गतवानहम्॥10॥ एवं सर्वेपि देवाश्च कालेनैकेन मां तदा। आह्वया मासुरायान्तमगमं

बहुरूपकैः॥11॥ नीलात्मकस्तदैवाग्निः कालाग्निरिव लोकहा। ममालयं समागच्छ मां पालय सुशील भो॥12॥ इत्युवाच स तेजस्वी तेजोरूपं च मां प्रति। कान्तरूपान्तरेणापि तद्गेहं गतवानहम्॥13॥ तदैव निरृतिः प्राप्तो वररुचिरुवाच सर्वदा। वायुप्रभृतिभिः सार्धं स्वैरं विहर मद्गृहे॥14॥ इत्युक्तवन्तस्ते सर्वेप्याह्वायामासुरञ्जसा। तत्तद्रूपान्तरैरेव तत्तद्गेहमगां तदा॥15॥ इत्थमेवाष्टदिक्पालैः स्पष्टं सम्प्रार्थितोस्म्यहम्'। इत्यादिना रुद्रादिसर्वदेवैः प्रार्थितत्वरूपसर्वदेवोपास्यत्वरूपलिङ्गव्याहरणम्। अस्य च ऋजधर्मत्वं 'कुविदङ्ग' इत्यादि श्रुतिसिद्धम्। पुनः तत्रैव 'अधिकारिषु चर्वेषु चोत्तमोहं न संशयः। इदं सर्वेपि जानन्ति देवाश्च ऋषयस्तथा॥' इति अधिकार्युत्तमत्वरूपलिङ्गकथनम्॥

नवमे 'तद्वन्ममापि कामेन हीनस्य मनसाप्यहो। नाथोह्यात्मानमेवासौ हयग्रीवो ददौ मुदा। परिरम्भण व्याजेन मन्दरे गुणवारिधिः' इति 'स्वात्मप्रदानमधिकं पवनात्मजस्य कुर्वन् समाश्लिषदमुं परमाभितुष्ट' इत्युक्तरीत्या हनुमत इव श्रीगुरुराजानां हरिणा स्वात्मप्रदानमुच्यते॥ हरिकर्तृकस्वात्मप्रदानयोग्यत्वं ऋजूनामेव युक्तम्। अत इदमपि ऋजुत्वलिङ्गमेव॥

दशमे 'व्याघ्रचर्मापि सन्मानं चाग्र्यपूजां चकार ह' इति रुद्रपूज्यत्वरूप हेतूत्कीर्तनम्॥ पञ्चदशे 'कुण्डले च गृहाणा त्वं मुण्डिनं मां सुभोजय॥ त्वदन्तर्यामिणं श्रीमन् सर्वेषां प्राणिनां गुरु'मिति सर्वगुरुत्वरूपलिङ्गसङ्कथनम्॥ सप्तदशे 'मत्सख्याद्विप्रदेहे तु मुख्यप्राणः स्थितोऽभवदिति' मुख्यप्राणसखित्वोक्तिः॥ एकविंशेऽध्याये 'हयग्रीवाज्ञया वातविरिञ्चौ स्वे च वैभवं॥ विना वाणीपतित्वं मे दत्तवन्तौ च किं वदे' इति वातविरिञ्चविभववत्त्वरूपलिङ्गोक्तिः॥

एवमुक्तदिशा ऋजुत्वनिश्चायक लिङ्गाभ्यासः॥ श्रीगुरुराजानां ऋजुत्वस्य बहुप्रमाणान्तराप्राप्तत्वात् अपूर्वता॥'योमां देवं विजानाति ऋजुस्थं पुण्यकृन्नरः॥ स याति चालयं पुण्यं' इत्युक्तं फलम्॥'अधिकारिषु सर्वेषु चोत्तमोहं न संशयः॥ इदं सर्वेपि जानन्ति देवाश्च ऋषयस्तथा' इति, तथा 'गन्धर्वा अपि सर्वेपि दानवा मानवाश्चन' इति ऋजुत्व ज्ञानिनां देवादित्वरूपस्तुतिः॥ तदज्ञानिनां दानवादित्वरूप-निन्दन-मित्यर्थवादो ज्ञातव्यः॥ अयं ऋजुः विष्णुविशिष्टप्रतिमात्वादिलिङ्गादिति उपपत्तिरिति॥ एवं चोपक्रमादिभिर्विचारे श्रीगुरुराजानां ऋजुत्वमाख्याने प्रतिपाद्यत इति सिद्धं भवतीति स्थितम्॥

अस्यार्थस्य 'तत्पूर्वमस्य वंशे तु' इत्यादि पुराण वचनानुयायित्वेन 'व्याससेवा रतो भूमौ वादिराजो

ऋजुर्यतिः॥ दुर्वादिनः प्रमथ्याशु मत्पदं यातुमर्हति॥ स्थापयिष्यति मच्छास्त्रं तेन मोक्षो भवेद्विवः' इति ब्रह्म वैवर्तस्थ वायुवचनानुयायित्वेन 'कलिं जय तद्विविक्षु'मिति श्रीगुरुराज मनसि कलिप्रवेशाभावप्रतिपादनेन ऋजुत्वबोधक तीर्थप्रबन्धवाक्यानुयायित्वेन च तथा तत्रैव 'याचे वरदराज त्वां काञ्चीशेह न किञ्चन॥ चेतनाचेतनजगद्वरं त्वामेव देहि मे' इति श्रीगुरुराजानां भगवदितरत्र कामनाभावप्रतिपादनद्वारा 'एकान्तानां न कस्यचित्। अर्थे नारायणो देवः सर्वमन्यत् तदर्थकम्' इत्युक्तरीत्या एकान्त भक्तत्वज्ञाप(कत्वेन)नेन 'मुख्येच सति नामुख्ये सम्प्रत्यय' इति न्यायात् प्रकृते च मुख्यैकान्तित्वस्य च ऋजुधर्मत्वाद् ऋजुत्वबोधकवचनानुयायित्वेन चैतद्विपरीत प्रमाणाभावेन च शास्त्रानुयायित्वं तदविरुद्धत्वं च ज्ञातव्यम्॥

एतेन आख्यानमप्रमाणं शास्त्राननुयायित्वात् विरुद्धत्वाच्चेत्यनुमाने अप्रसिद्धिरुक्ता भवति॥ अप्रामाण्यकारणयोः शास्त्राननुयायित्व तद्विरुद्धत्वयोरभावादिति॥

ननु गुरुराजानां ऋजुगणस्थत्वमेव न उपपद्यते येन तत्प्रतिपादकाख्यानस्य प्रामाण्यं स्यात्। तथाहि 'नौमि शङ्करवाहनम्' इत्यादिषु गुरुराजैरेव ऋज्ववरनन्द्यादिनमनकर्तृत्वोक्तेः॥ तथा 'हनुमत्किङ्करः पातु' इत्यादिषु वायुदासत्वादेः प्रतिपादनाच्च॥ ऋजुगणस्थत्वे हि स्वसमानवायुभृत्यत्वादिकं न उपपद्यते। वायोः ब्रह्मणस्तथा ऋजूनां च 'ऋजुपुङ्गवस्य परिजानतः स्वयम्' इति मध्वविजयश्लोकव्याख्याने विश्वपतिस्वामिभिः, तथा 'अन्यशब्दो हरिश्री-स्वसमेभ्योन्यविवक्षये'त्यनुव्याख्यानसुधायां च साम्यमेव प्रतिपादितम्॥ अतो गुरुराजानां ऋजुगणस्थत्वं न युज्यत इति॥

मैवम्॥'प्रजायते हि यत्कुले यथायुगं यथावयः॥ तथा प्रवर्तनम् भवेद्दिवौकसां समुद्भव'॥ इत्युक्तप्रकारेण भीमसेनादिकर्तृकधृतराष्ट्रनमनादिवत् मनुष्यत्वेन अवतीर्ण गुरुराजानां नन्द्यादिनमनं युक्तमेव॥ तत्करणं तु लोकशिक्षार्थमेवेत्यतो न तावन्मात्रेण ऋजुत्वं व्याहन्यते॥ प्राणभृत्यत्वादिकमपि लोकशिक्षार्थं प्रदर्शितम्॥ तदनुरोधेन 'हनुमत्किङ्करः पातु' इत्युक्तम्॥ तस्मात् तन्नऋजुत्व बाधकमिति॥

अथवा 'शर्वादिवन्द्यचरणो यदपाङ्गलेशम्' इत्यादिषु रुद्रशेषादीनां स्वरूपसाम्येपि युगाधिक्याभिप्रायेण नम्यनमकभावोक्तिवदत्रापि स्वामिभृत्यभावादिकमुपपद्यत इति॥ उक्तश्च

छान्दोग्ये तृतीयेध्याये 'अथ यत्पञ्चमममृतं तत्साध्या उपजीवन्ति ब्रह्मणामुखेन' इति ब्रह्मणः ऋजूनां च गुरुशिष्यभावः प्रमाणान्तरसिद्धस्वरूपसाम्येपीति॥ अतः श्रीगुरुराजानां ऋजुत्वेपि मुख्यप्राणप्रार्थनादिकं सर्वमुपपद्यत इति न कश्चित् क्षुद्रोपद्रवः॥

ननु 'तत्पूर्वमस्य वंशे तु' इत्यादि वचनानुयायित्वेन च आख्यानस्य प्रामाण्यमुपपादितम्॥ नेदं चोपपद्यते॥ तद्वचनानां सर्वपुराणकोशेष्वदर्शनेन इदीनीन्तनैः परिकल्पितत्वात्। न हि परिकल्पितमानाभासानुयायित्वेन प्रामाण्यं सिद्ध्यतीति॥

मैवं भाषिष्ठाः॥ एवं चेत् श्रीमदानन्दतीर्थभगवत्पादानां वायुत्वप्रतिपादक वाक्यानां तथा भाष्याद्युदाहृत भारतादिवाक्यानां च सर्वकोशेष्विदानीमदर्शनात् परिकल्पितत्वमिति श्रीमद्भाष्यकाराणामवायुत्वं भाष्यादेरनुपादेयत्वं च प्रसज्येत॥ अतो ग्रन्थविलोडकैर्दुष्टैः क्वचित् कोशेषु तानि प्रमाणानि न लिखितानीति सर्वैरप्यङ्गीकरणीयमिति अलं पल्लवितेन॥

तथाहि॥ अस्मिन्नाख्याने प्रथमाध्याये 'हयग्रीवं चिदानन्दविग्रहं सदनुग्रहम्। दशग्रीवच्छिदं शापान्मणिग्रीवविमोचनम्॥1॥ सुग्रीवाभयदं सम्यगुग्रसेन विभूतिदम्। उग्रविग्रहहन्तारं भक्ताभयकरग्रहम्॥2॥ स्वनामग्रहणादेव निरस्तग्रहविग्रहम्। वृन्दावनगतं वन्दे ब्रह्मरुद्रेन्द्रवन्दितम्' इत्यारभ्य चिदानन्दात्मना हरेर्हयग्रीवाद्यनेकरूपैः सोदापुरस्थ श्रीवृन्दावनसन्निहितत्वमुच्यते। तथा 'त्रयस्त्रिंशच्च कोटीनां देवाः सन्निहिताः सदा॥ मम वृन्दावने पुण्ये हयग्रीवस्य चाज्ञया' इत्यारभ्य तीर्थक्षेत्रपर्वताद्यभिमानिदेवानां तथा इतरदेवानं च वृन्दावने धवलगङ्गायां च सन्निहितत्वं निगद्यते। किञ्च 'रजतपीठपुरमप्रतिमं भुवि पुरटपीठगतमप्रतिमं हरिम्॥ करटबुद्धिरपि याति को महान् सरटजन्म न जहाति तद्गतः'इत्यस्मिन् श्लोके पुरटभाजनाधिरूढ बादरायणागमनं रजतपीठपुरे भवतीति प्रतिपाद्यते। अत्र पुरटभाजनाधिरूढो बादरायणः 'स्नेहार्द्रमध्वहृदयाख्य दशानुषक्तम्' इत्यस्मिन् तीर्थप्रबन्ध श्लोके पुरटभाजनाधिरूढत्वेन प्रतिपाद्यो मध्यवाटमठस्थः विवक्षितः। रजतपीठपुरमिति श्लोकार्थस्तु भुवि अप्रतिमं रजतपीठपुरं पुरटपीठगतं अप्रतिमं हरिं याति हरिप्राप्तिमद्भवतीति यावत्। तद्गतः रजतपीठपुरस्थः करटबुद्धिः काकबुद्धिः हरेस्तद्भक्तानाञ्च माहात्म्यज्ञानशून्य इति यावत्। अत एव अमहान् कोऽपि सरटजन्म न जहाति कल्यावेशनिमित्तकदुर्बुद्धिं न जहाति॥ रजतपीठपुरं प्रत्यागतं श्रीबादरायणं न पुरस्करोतीति यावत्॥ इति॥

स च बादरायणः श्रीविश्वप्रियतीर्थश्रीमच्छरणात्मना अवतीर्णेन श्रीवृन्दावनाचार्य इति प्रसिद्धेन स्वप्नद्रष्टृब्राह्मणेन रजतपीठपुरे चानीत इति तदानीं तत्रत्यतिदुष्टास्तं न पुरस्कृतवन्त इति च सर्वप्रत्यक्षसिद्धम्॥ किञ्च 'अथ मधुं युधि निहत्य मोदते' इत्यादिना हरेः मधुनामक दैत्यहनन महिमा, बहुरूपधारिण्या लक्ष्म्या सेव्यमानत्वमहिमा च निरूप्यते॥

तथा द्वितीये अध्याये 'भेरिशङ्खमृदङ्गैश्च पणहानकगोमुखैः' इत्यादिना श्रीसोदापुरे श्रीत्रिविक्रम रथोत्सव सम्भ्रमः, तस्मिन् उत्सवे सर्वदेवादीनामागमनसम्भ्रमश्च उच्यते॥ तथा 'पश्यामि चाकाशविमानकोशे' इत्यस्मिन् श्लोके योजनाभेदाभिप्रायेण श्रीवेदवेद्यस्वामिभिः त्रिविक्रमसेवा कर्तव्येति, स्वप्नद्रष्टृ ब्राह्मणेन जन्मान्तरे श्रीबादरायणसेवा कर्तव्येति च निरूप्यते॥

तथा च 'पश्यामि चाकाशविमानकोशे नाकीशमित्थं सुत सत्यमेव॥ कीनाशलोकस्य च नाशकोहं तोकस्य सेवां कुरु सर्वदैव' इति श्लोकस्य चेत्थं योजना॥ वेदवेद्यश्रीमच्चरणानां पक्षे, हे सुत, करकमलसञ्जात वेदवेद्य, आकाश विमानकोशे मद्वृन्दावनोपरिस्थाकाशगतविमानकोशे, नाकीशं देवानामीशं त्रिविक्रममित्थमेव पश्यामि। पूर्वोक्त प्रकारेणैव पश्यामि। हे तोक, अस्य हरेः सेवां सर्वदैव कुरु॥ त्वयापि एतादृशविमानस्य प्राप्यत्वात् तदर्थत्वेन तत्स्थत्वेन श्रीहर्युपासनं त्वमपि कुर्विति भावः। अस्य विमानस्यान्तकनाश्यत्वे तादृशविमानप्राप्त्यर्थं प्रयासः कुत इति शङ्कानिवृत्तये कीनाशलोकस्य च नाशकोहमित्युक्तम्॥ तथा च महा सामर्थ्योपेतस्य मम विमानस्यान्तकभयवं नास्तीती भावः। सत्यमेवेदम्। तथा च त्वया प्राप्यविमानस्यापि तादृशत्वात् तत् प्राप्त्यर्थं श्रीहरिसेवाकार्यैवेति भाव इति।

ब्राह्मणपक्षे तु हे सुत प्रीतिविषय विप्र, आकाशविमान कोशे सम्यक्प्रकाशमान मध्यवाटमठस्थविमानसदृशसम्पुटकोशे स्थितं सत्यं 'सत्यस्य विष्णोः मातरम्' इत्युक्तेः सत्यनामानं बादरायणमित्थमेव पूर्वोक्त श्रीत्रिविक्रमदेवनाकीशं नाकिभावयोग्यस्य तवेशं पश्यामि॥

यथा श्रीत्रिविक्रमो नाकिनो देवेन्द्रस्य त्याजितपदस्य पुनः पदप्राप्तिहेतुत्वेन तस्येशस्तथा अयमपि तव नाकित्व प्राप्तौहेतुत्वेन तवापीश इति भावः। तस्मात् हे तोक अस्य बादरायणस्य पूजालक्षणां सेवां सर्वदैव कुरु।

तादृश बादरायणसेवा अस्मिन् जन्मनि कथं घटत इति विप्रस्य मानसिकाकाङ्क्षा

निवृत्त्यर्थमितःपरमित्युत्तरश्लोकेऽभिहितम्। तथा चेतः परं अस्मात् जन्मन अनन्तरं सेवा कुर्विति पूर्वेणान्वयः।

सर्वदा सेवा घटनार्थं श्रीबादरायणानयने सति दुष्टानां दुरुक्त्या मध्यमजनानां बुद्धौ तव प्रसक्तकीनाशलोकस्य चाहं नाशकः॥ श्रीबादरायणानयनस्यादोषत्व ख्यापनेन तस्य यमलोकप्राप्तिहेतुकत्वबुद्धेर्नाशक इति भाव इति योजना।

एवमेवास्मिन्नध्याये केषाञ्चित् पद्यानां योजना भेदेनार्थभेदो ज्ञातव्यः।

तथा 'सुखी भव सखायां मां' इत्यस्मिन् श्लोके योजनाभेदाभिप्रायेण वेदवेद्यस्वामिभिस्तथा विप्रेण यतित्वदशायां च मखाग्र्येण श्रीहर्याराधनस्य कारयितव्यत्वमुच्यते॥ 'सुखी भव सखायां मां मखाग्र्येणापि पूजय॥ शिखारहित ते दुःखावाप्तिर्न च नखादपि' इति श्लोकस्य चैवं योजना॥ गूरूक्तित इति पुत्रक इति च पूर्वश्लोकस्थमुत्तरश्लोकस्थं चात्रान्वेति॥ तथा च, हे शिखाराहित पुत्रक यतित्वविशिष्टकरकमलसञ्जात वेदवेद्य सखायं ऋजुत्वात् तव सखीभूतं मां मखाग्र्येणापि पूजय॥ यतित्वात् कथं मखकर्तृत्वमित्याकाङ्क्षायामुक्तं गुरूक्तित इति॥ मखकर्तारं प्रति गुरुभूतस्य तव या उक्तिः मखं कुर्वित्याकारिका उक्तिस्तद्वारा पूजयेति भव। मखं कारयेति यावत्॥ अत्र मखाग्र्येण गुरुराजाराधनं नाम मखाग्र्येण गुरुराजान्तर्यामिणः हरेराराधनं विवक्षितम्। तथाच गुरुराजन्तर्मामिणमुद्दिश्य यज्ञादिकं कर्तव्यमिति सज्जनशिक्षा कार्येति फलितोर्थः। तेन सुखि भव॥ नखादपि ते दुःखप्राप्तिर्नास्तीति।

विप्रपक्षे जन्मान्तरे विप्रस्य यतित्वात् शिखारहित इति तत् सम्बोधनम्॥ तथा च शिखारहित तुर्याश्रमविशिष्ट पुत्रक पुत्रवत् प्रीतिविषय विप्र सखायां तन इन्द्रत्वदशायां सखीभूतं पूर्वं प्रसक्तं त्रिविक्रमं तथा मामपि मखाग्र्येण पूजय॥ शेषं पूर्ववत्॥ अत्रापि मखाग्र्येण गुरुराजाराधनं पूर्ववदेव विवक्षितमिति॥

गुरुराजान्तर्यामिविषयतया यज्ञादिकरणस्य दृढीकरणार्थं प्रवृत्तः 'नरके नरकान्तं च' इत्युत्तरश्लोकः॥ तथा च नरके नरकान्तं च स्मर त्वं नरकेसरिम्। गुरोर्ममापि कारुण्यम् गृहाणेह सुपुत्रक इति श्लोकस्य चायमर्थः हे सुपुत्रक मदन्तर्यामिणमुद्दिश्य यज्ञादिके कृते नरकाद्यनर्थः प्राप्नोति वा किं वेति बुद्धिदोषवशात् शङ्कया नरके स्मृते सति तादृशविपरीतशङ्काजनितदुरितनिवृत्तये नरकान्तं नरकहेतुदुरित-निवारणद्वारा नरकप्राप्तिपरिहारकं

नरकेसरि श्रीनृसिंहं स्मर॥ तथा च दुरितनिवृत्तिर्भवतीति भावः॥ मत्स्मरणादिना गुरोर्ममापि कारुण्यं गृहाण॥ तेनापि दुरितनिवृत्तिर्भवतीति ज्ञातव्यमिति॥

अत्र मामपि कारुण्यं गृहाणेति एतावता पूर्तौ मुख्यगुरुत्वबोधक निरुपपदगुरुशब्दं प्रयुञ्जानाः श्रीवादिराजश्रीमच्चरणाः श्रीवायोः मुख्यगुरुत्वात् स्वान्तर्यामिणमुद्दिश्य यज्ञादिकरणप्रयोजकीभूतं स्वेषां मुख्यगुरुत्वं सूचयामासुरिति॥ एवं विपरीतशङ्कायां तज्जनितदुरितनिवारणार्थं नरसिंहस्मरणादिकं कर्तव्यमित्यपि लोकशिक्षा कर्तव्येत्यभिप्रायेणैव प्रवृत्तमिदम्॥ वेदवेद्य श्रीमच्चरणानां स्वप्नद्रष्टृब्रातह्मणस्य चैतादृशशङ्काभावादिति ज्ञातव्यम्॥

इदं च विश्वप्रयितीर्थश्रीमच्चरणैः श्रीगुरुराजान्तर्यामिणमुद्दिश्य मखाग्र्यं कारितम्॥ तथा लोके सर्वं यज्ञादिकर्म गुरुराजान्तर्यामिणमुद्दिश्य कर्तव्यमिति सज्जनाः शिक्षिताश्चेत्यतो ह्यनुभवसिद्धमिति॥

तथा तृतीये अध्याये 'दास्यत्ययं मनुं दिव्यं वादिराज इतीरितम्॥दास्यत्ययं मनुं दिव्यं वादिराजयतीरितम्॥ ओं श्रीकारद्वयेनापि पूर्वापरसमन्वितम्॥ नमः शब्द चतुर्थ्यन्तगुरुशब्दैश्चमिश्रितम्' इत्यनेन गुरुराजमन्त्रप्रकारः कथ्यते॥

'एतां कृत्वा शिलायां मम कृतिमथ च स्थापयेत् तां च दृष्ट्वा सन्तः सन्तोषभाजः सुमतिदमशमैर्युक्तमात्मानमीशम्॥ ज्ञात्वा देवेषु मुख्यं शुभगुणसुमुखं नित्यनिर्धूतहेयं मामेवं सद्गुणाढ्यं शुभविततगतिं यान्तु सन्त सदा ते॥' इत्यनेन गुरुराजऋजुत्वादि-प्रतिपादिकायाः कृतेः कृतिमथ चेति च शब्दसमुच्चितमन्त्रस्य च शिलायां लेखनं कार्यं तथा च स्थापिनीया, तां दृष्ट्वा सन्तः शुभगतिं यान्तु, इत्यप्युच्यते॥ तथा 'पञ्चाशद्योजनानां तु विस्तीर्णं कार्तभास्वरम्' इत्यारभ्य 'विमानं दिव्यमानं च दीप्यमानं सदायनम्॥ वृन्दावनोपरिगतं पूजयन्तु सदा मम' इत्यन्तेन वृन्दावनोपरिस्थविमानस्य पूजनीयत्वमुच्यते॥ तथा'मेरौ मारमणं दृष्ट्वा रममाणो रमापतेः॥ करकञ्जं रमायाश्च शिरसा मानयाम्यहं' इत्यारभ्य 'एवं सुमानं सुमनोभिरञ्जसा सञ्जातमर्घ्यं सुजनार्यं सर्वम्॥ कञ्जाक्षगृह्णामि चिरं तु जीव त्वं जीवलोके कुजनार्तिदः सन्' इत्यन्तेन श्रीगुरुराजानां मेर्वादि देवसदनगमनं तत्रतत्रत्य-भगवन्मूर्तिदर्शनादिकं, तत्रतत्रत्यदेवैः पूज्यत्वं च निगद्यते॥ किञ्च 'सुरराजप्रसादेन अमरराजो भव द्विज' इति स्वप्नद्रष्टृब्राह्मणस्य इन्द्रपदप्राप्तिर्भवत्विति श्रीगुरुराजवर प्रादानम्॥'मृत्कृतौ यस्य विश्वासो नास्ति तस्य यशः श्रियः॥ आयुष्यं स्रवते भिन्नघटान्तःस्थोदकं यथा॥' इत्यस्मिन्नाख्याने विश्वासरहितानामायुः

क्षीणं भवतीति च निरूप्यते॥एवं'तदेव मत्कलेवरं द्विजस्य यत्कलेवरम्॥' इत्यनेन स्वप्नद्रष्टृब्राह्मशरीरस्य श्रीगुरुराजसन्निधानपात्रत्वमुच्यते॥

चतुर्थे तु काञ्चनीयाञ्चनीयां' इत्यस्मिन् श्लोके नाकिभावयोग्यस्यास्य ब्राह्मणमस्य पुरटभाजनस्थबादरायणार्चनं श्रीगुरुराजप्रसादं च विना स्वयोग्यपदप्राप्तिर्नभवतीति निगद्यते॥'काञ्चनीयाञ्चनीयां तु काञ्चनीयान्मयाञ्चनात्॥ तां विना मां विना नाकी नाकित्वं नैति नान्यथा' इति श्लोकस्य चेत्थं योजना। काञ्चनीयात् अञ्चनात् पौरटपूजाभाजन निमित्तात् या काञ्चनीया पुरटपीठसम्बन्धिनी तां मया अञ्चनीयामर्चितुं योग्यां बादरायणमूर्तिं मां च विना नाकी, नाकिभावयोग्योयं ब्राह्मणो नाकित्वं नैति॥ इदं चान्यथा नेति॥

तथा 'हे पुत्र दिव्यकटिसूत्र' इति श्लोकद्वयेन ब्राह्मणस्य श्रीगुरुराजपाद पीठाग्रतः तत्वज्ञानार्थं कृतसच्छास्त्रव्याख्यानेनेन्द्र पदप्राप्तिरिदानीमेवा-भूदिव भातीति श्रीगुरुराजैर्निरूप्यते॥ तथा च 'हे पुत्र दिव्यकटिसूत्र शुभाक्षसूत्र सच्छास्त्रवृत्तिभिरहो प्रतिभासि मे त्वम्॥मद्दत्तमन्त्रजपतः सुकृतैकपात्र वृत्रस्य शत्रुपदवीं जितवानितीव॥ अग्र्यासने सुनिहितं मम पादपीठं सम्यक् प्रपूज्य विधिवत् परमप्रकाशम्॥ तस्याग्रतः परमदर्शन गुह्यसारं व्याख्येयमेयमनिशं प्रदिशामि तेद्य' इति श्लोकद्वयस्य चेत्थं योजना॥ दिव्यकटिसूत्र शुभाक्षसूत्र मद्दत्तमन्त्रजपतः सुकृतैकपात्र हे पुत्र प्रीति विषय विप्र, अग्र्यासने सुनिहितं मम पादपीठं विधिवत् प्रपूज्य तस्याग्रतोऽनिशं त्वया कृताभिरिति शेषः॥ सच्छास्त्रवृत्तिभिः सच्छास्त्रव्याख्याभिः त्वं वृत्रस्य शत्रुपदवीमिन्द्रस्थानं जितवानितीदानीमेव प्राप्तवानितीव मे भासि॥ पदप्राप्तिसाधनस्य जातप्रायत्वाभिप्रायकमिदं वचनम्॥ अद्य ते परमदर्शनगुह्यसारं व्याख्येयमेयं व्याख्यातुं योग्यं प्रमेयं प्रदिशामि॥ एवमायुरादिकं च प्रदिशामीत्युत्तरश्लोकेनान्वयः॥ अत्र दिव्यकटिसूत्र शुभाक्षसूत्रेति च विशेषण बलात् विप्रस्य यतित्वदशायामिदं कार्यजातमिति निश्चीयत इति॥ श्रीविश्वप्रियतीर्थ श्रीमच्चरणैः श्रीगुरुराजपादपीठाग्रतः श्रीमच्छास्त्र पठनादिकं कृतम्॥ तेनैव विशिष्ट शास्त्रार्थोद्बोधनं च जातमिति तद्विषयकमेवेदमिति प्रतीमः। तथा 'शुभस्य वार्तामाहर्तुः सर्वे कुर्वन्तु मान्यताम्॥तथा मद्वैभवाहर्तुः सर्वे कुर्वन्ति मान्यताम्॥ मध्वार्थं मद्गतप्राणं ब्राह्मणं प्रापणं गुणान्॥ येऽवजानन्ति नाकीन्द्रभृत्यं मद्द्रोहिणश्च ते॥' इति ब्राह्मणस्य मानकरणमुक्त्वा अकरणे प्रत्यवायश्चोच्यते॥ एवमेवानेक-प्रमेयान्यस्मिन्नध्याये निरूप्यन्ते॥

तथा पञ्चमे 'अस्यां मम कृतौ यस्य विश्वासो नास्ति दुर्मतेः। तस्मिन्नाशास्यता नस्यात् व्यासस्यैवाज्ञया हरेः इत्यनेन श्रीवृन्दावनाख्याने विश्वासरहितानामाशास्यत न स्यादिति निरूप्यते॥ आशास्यत तु गरूपदेशयोग्यता ज्ञेया॥ तथा 'सत्यं सत्यं पुनः सत्यं चोद्धृत्य भुजमुच्यते॥ विप्रेणोक्तं च यत्सर्वं तत्सर्वं च मयोदितं', इत्यनेन विप्रोक्तं यत्सर्वं तत्सर्वं विप्रान्तर्गत श्रीगुरुराजैरेवोक्तमिति चोच्यते॥ तथा 'मन्मनःसन्निकर्षेण त्वन्मनः स्मृतिकारणम्॥ दिने दिनेऽभिजानीहि कानीह सुकृतानि ते॥ मन्नेत्र सन्निकर्षेण नयनं ते सुदर्शनम्॥ दिने दिनेऽभिजानीहि कानीह सुकृतानि ते॥ मत्कर्णसन्निकर्षेण त्वत्कर्णं श्रृणुतेऽनिशम्॥ दिने दिनेऽभिजानीहि कानीह सुकृतानि ते॥ मज्जिह्वायुक्तत्वजिह्वाप्यंहोमुग्वचनं भवेत्॥ दिनेदिनेऽभिजानीहि कानीह सकृतानि ते॥ मद्घ्राणसन्निकर्षेण त्वद्घ्राणं जिघ्रतेऽनिशम्॥ दिनेदिनेऽभिजानीहि कानीह सुकृतानि ते॥ मद्धस्तसन्निकर्षेण त्वद्धस्तः कुरुते कृतिम्॥ दिनिदनेऽभिजानीहि कानीह सुकृतानि ते॥ मत्पादसन्निकर्षेण त्वत्पादं चलते पदम्॥ दिनेदिनेऽभिजानीहि कानीह सुकृतानि ते॥ सर्वाणि करणानीति युक्तमत्करणानि ते॥ कर्माणि पुण्यरूपाणि कुर्वन्ति मम सन्निधेः' इत्यनेन विप्रस्य मन आदि करणानां गुरुराजकरणसन्निधानपात्रत्वमुक्तम्॥

'अहं रमामि रामेण रमारमणरूपिणा॥ अहं पुष्णामि कृष्णेन भाषितं विष्णुरूपिणा॥ अहं पृच्छामि मत्स्येन सच्छास्त्राणि प्रसङ्गतः॥ गच्छामि कच्छपेनैव स्वच्छरूपेण स्वेच्छया॥ वराहेण करारोहे नमितोऽहं च राहुणा॥ नृसिंहेन कृतस्नेहे सैंहिकेयेन पूजितः॥ वामनेन च सन्माने कामेनापि सुमानितः॥ भार्गवेणैव चानर्घे माने सति च स्वर्गिणा॥ गर्गादिमुनिभिः सार्धं श्रद्धयाऽऽराधितोऽस्म्यहम्॥ बुद्धः प्रबुद्धः सिद्धेशोऽबद्धबुद्धिप्रबोधकः॥ बौद्धराद्धान्तसिद्धार्थं देवानां बोधयत्यलम्॥ स देवो वरदो मह्यं कदाचेह समागतः॥ इति मामुक्तवान् सूक्तं स्वपादे चाऽपदाऽऽत्यजत्॥ कल्की सङ्कल्पसंसिद्धो म्लेञ्छमूलकुलान्तकः॥ अनल्पमपि चालस्यं चालयामास लीलया' इत्यनेन श्रीगुरुराजानां दशावतरा रूपिणा हरिणा सह विहारः शास्त्रविचारः सञ्चारश्चेत्यादिकमभूदिति निगद्यते॥ तथा 'मार्ताण्डरथमारुह्य स्वाण्डार्तेन सुमानितः॥ शरकाण्डज मातृणां करकाण्डेन पूजितः॥ भानुमण्डलगं विशणुं को नु ब्रह्माण्डसंस्थितः॥ दोर्दण्डादर्चयन् साक्षान्मानं विनाऽण्डस्य शक्तिमान्॥ सूर्यस्य रथमाश्रित्य

वीर्यस्य परमात्मनः॥ आर्यस्यापि ममाऽस्यान्तं कार्यस्यान्तं गतं मया॥ एवं सुष्ठु रथे तिष्ठन् पृष्ठतः परमात्मनः॥ काष्ठान्तं यामि कामेन स्पष्टं पश्यंश्च सज्जनान्॥ शिंशुमारं समासाध्य कंसमारेण चादृतः॥ संसरामि पुनर्नाहं कं सरामीति याचये॥ स देवो वरदो मह्यं करदाय महाप्रभुः॥ स्मरदाश्रितदुष्कर्म विददार हरिः स्वयम्॥ तत्पुच्छान्तं न पश्यामि स्वर्गमूर्तेर्महात्मनः॥ पृच्छामि स्वच्छतत्वानि तत्पुच्छगततेजसाम्॥ स चोपदिष्टवान् स्पष्टं ज्योतिर्मण्डलमण्डनम्॥ धृवादि सर्वलोकानां पारकत्वं स्ववैभवम्॥ एवं क्रमेण सर्वाणि ज्योतींशि गतवानहम्॥ तेजसा सर्वचक्षूंषि मुष्णन् विष्ण्वाज्ञया सदा॥' इत्यनेन श्रीगुरुराजानां सूर्यमण्डलादि तेजोमण्डलगमनम् शिंशुमार दर्शनादिकं, गुरुराजतेजसा सर्वतेजसां तिरस्कारश्चाभूदित्यादिकं निरूप्यते॥ 'अहं नमामि कामेन मानवायान्नदाय च' इत्यादिना अन्नदानमहिमा निगद्यते। अन्नदाय मानवाय' इति तादर्थ्ये चतुर्थि॥ तथा च अन्नदाय मानवाय तदर्थे तद्धि हितार्थं श्रीहरिमहं नमामीति योजना द्रष्टव्या॥ तथा 'अहमेकेन रूपेण शोकं परिहरन् सदा॥ श्लोकान् वक्तुं प्रविष्टोहं काकबुद्धौ द्विजोत्तमे॥ तथैकेनैव रूपेण मत्तोके च प्रविश्य तु॥ लोकस्य दर्शनात् सद्यः शोकं परिहराम्यहम्॥ देववृन्द – समायुक्तो मद्बृन्दावन संस्थितः॥ सद्बृन्दानां प्रयच्छामि चेष्टवृन्दानि सर्वदा' इत्यनेन श्रीमदाख्यानं वक्तुं विप्रे च एकेन रूपेण, भक्ताभीष्टदानार्थं श्रीवेदवेद्य श्रीमच्चरणेषु, श्रीमहावृन्दावने च रूपान्तराभ्यां श्रीगुरुराजानामावेशः चोच्यते इत्यादीनि प्रमेयान्नस्मिन्नध्याये निगद्यन्ते॥

षष्ठे 'तथैव नन्दने पुण्ये वने नन्दनमानितः॥ इन्द्राण्येन्द्रेण चानन्दी मन्दाकिन्यां रमाम्यहम्॥ तथापरेणरूपेण मेरौ नारायणार्चकः॥ सुराणां शरणे रम्ये करणैर्मरणार्तिभिः॥ मुक्तो युक्तो हरेर्भक्त्या शक्त्या सूक्त्या च शक्तिमान्॥ पृक्तस्तुषारैर्नेत्रोत्थैः प्राक् तृष्णान्त्यक्तवानहम्॥ तत्र चैवं चिरं रम्ये रमारमणसारणे। कारणं च विनारीणां शरणं यामि चारणैः॥ एवं मेरौ सदारामे चाराधनपरायणः॥ नारायणस्य चरणे मरणार्तिं जहामि च॥ तथैकेनैव कालेन कैलासे निर्मलाचले॥ सालवृक्षशतालोले कोलादिमृगचञ्चले॥ पालिते बालरूपेण कालनं कुर्वताऽसताम्॥ लोकेशपालकेनापि लालितोहं न संशयः'॥

तथा 'अहमेकेनेरूपेण स्वर्गेऽनर्घ्येण घर्घरम्॥ दीर्घज्ञानं दिशाम्यद्धा गर्गादीनां न संशयः॥ यमोपि कमनीयं मे रूपं दृष्ट्वा मनोरमम्॥ कः पुमानीदृशोऽस्माकं लोकं नाकं त्वमागतः॥

इत्यपृच्छत् प्रचेताश्च सुचेता अपि काश्चन॥ रामोऽपि तत्र मां दृष्ट्वा कामेन रहितं मुनिम्॥ सुमनोहर मे नित्यं भृत्यो भव समीपगः॥ इति मामुक्तवान् सूक्तं स्वपादे चाऽपदाऽत्यजत्॥' इत्यादिना श्रीगुरुराजानां नन्दनादि स्थानेषु देवैर्मानितत्वादिकमुच्यते॥ किञ्च, 'नरके परकीयाश्च सुरकार्यविवर्जिताः॥ स्वकीया अपि पाकीयाः प्रकीर्य मम पूजनम्॥ शरणं मरणातीतं करुणाकरमञ्जसा॥ तरणिं मोहसरणेः स्फुरणं करणं च माम्॥ आगताः स्वागतोक्त्या च का गतिः पापिनामिह॥इत्यपृच्छन् स्वच्छतत्वं कुत्सितं कर्म तत्यजुः॥ क्रकचच्छेदनं चापि छित्वा सर्वे दिवं ययुः॥' इत्यनेन श्रीगुरुराजैर्नरकस्थाश्चोद्धृता इत्युच्यते॥ 'यथा वायुस्तवायुष्यवृद्धये वर्तते त्वयि॥ तथाऽहं वर्तयाम्यत्र विप्रे पुत्र न संशयः॥' इत्यनेन श्रीमुख्य समीरणस्यायुष्याभि-वृद्धिहेतुत्वेन शरीरे यथा अवस्थानं, एवमेव अहमपि विप्रेह्यायुष्याभिवृद्धिकारणतया संस्थित इति श्रीगुरुराजैः निरूप्यते। इत्येवमादीनि प्रमेयाण्यस्मिन्नध्याये निगदितानि॥

सप्तमे 'एवं वै देवतालोके पाकशासनपूर्वकान्। दृष्ट्वाचाकाशगामि तु सत्यलोकमितोऽगमम्॥ तत्रैव निवसाम्यद्धा शुद्धान्तःकरणः सदा॥ बद्ध्वा हयग्रीवपादं श्रद्धायुक्तस्य सुस्थिरः॥ तत्रापि मां हयग्रीवः श्रुत्यर्थं सर्वमेव च॥ ग्राहयामास सर्वज्ञो वर्गे वर्गार्थतत्ववित्॥' इत्यनेन श्रीगुरुराजानां सत्यलोकगमनं, श्रीहयग्रीवमुखेन श्रुत्यर्थग्रहणं च जातमिति निरूप्यते॥ तथा 'वैद्यो धन्वन्तरिश्चायं' इत्यादि श्लोकत्रयेण श्रीगुरुराजानां श्री कृष्णावतार कालेऽवतारं, तत्र श्रीरुक्मिणीपत्रानयनं श्रीकृष्णसमीपे कृतमिति च चैद्यशाप प्रसङ्गनेन स्वस्य भैष्मीप्रेष्यत्वकथनेन च सूचयित्वा, श्रीहरिणाकृतगान्धारीशाप परिग्रहवत् स्वेन परिग्रहीतचैद्यशापमोचनं हरिणा अकारीति, तथा श्रीहरिदत्त ज्ञानामृतेन श्रीमदाचार्याणां देहयोगत्यागलक्षणजनिमरणाभाववत् ममापि देहयोगत्यागलक्षणजनिमरणे न स्त इति श्रीगुरुराजैः निरूप्यते॥

तथा च 'वैद्यो धन्वन्तरीश्चायं चैद्यशापाख्यरोगहा॥ चोद्यं च कृतवान्मह्यं चाद्यन्तौ हृतवान्मम॥ भैषज्यं कृतवान्मह्यं वैषम्यरहितः प्रभुः॥ भैष्म्याः पतिप्रसादाख्यं प्रेष्यस्य स महाभिषक्॥ एवं ज्ञानामृतं श्रीमन् नानृतं चोच्यते मया॥ को मृतिं नानुयातीह मामृते तं वदस्व ह (मे)' इति श्लोकत्रयस्येत्थं योजना॥ चैद्य शापाख्य रोगहा चैद्यस्य रुक्मिणीविवाहे प्रसक्ते तद्विनिघटनाय श्रीकृष्णं प्रतिरुक्मिणीदेव्या दत्तपत्रे तदा अवतीर्णेन मया नीते सति मयि क्रुद्धेन चैद्येन भैष्म्याः प्रेष्यस्य मम यः शापो दत्तः, तस्य शापाख्यस्य रोगस्य हर्ता वैद्योयं धन्वन्तरिर्यतः मम आद्यन्तौ

(आदि-अन्तौ) हृतवान्, अतः मह्यं चोद्यं च कृतवान् लोके वैद्यस्य रोगमात्रनिवारकत्वम्॥ अस्य तु उत्पत्तिविनाशनिवारकत्वमधिकमिति भावेन चोद्यमित्युक्तम्॥ चैद्यस्थितिकाले श्रीगुरुराजानामवताराभावे चैद्यशापासम्भवात्, तच्छापोक्त्या तदानीमवतारसिद्धिः॥ केन औषधेनेदं कार्यं कृतवान्? इत्यतो भैषज्यमित्यभिहितम्॥ मह्यं भैष्म्याः प्रतिप्रसादाख्यं श्रीकृष्णप्रसादाख्यं भैषज्यं कृतवान्। लोकविलक्षणभैषज्य कर्तृत्वात् प्रभुः॥ भैष्मीप्रेष्यस्य श्रीकृष्णप्रसादे को हेतुरित्यतः तत्पतित्वादिति द्योतयितुं कृष्णप्रसादाख्यमित्याद्यनुक्त्वा भैष्मीपति प्रसादाख्यमित्युक्तम्॥ चैद्यशापकारणीभूतस्य कृष्णं प्रति रुक्मिणी पत्रनयनस्य प्रदर्शनाय, भैष्मी भक्तस्येत्याद्यनुक्त्वा भैष्मीप्रेष्यस्येत्युक्तम्। अत्र भैष्म्याः पतिरित्यसमस्ततयोक्त्या भैष्म्या इत्यस्यावृत्तिरभिप्रेयते॥ तथाचोक्तरीत्या भैष्म्याः पतिप्रसादाख्यमिति भैष्म्याः प्रेष्यस्येति चान्वयसिद्धिः॥

भैष्मीपत्यभिन्नेन धन्वन्तरिणा स्वपत्नीप्रेष्ये वैषम्यादयोग्यमपि प्रसादाख्यं भैषज्यं कृतं किमित्यत वैषम्यरहित इत्युक्तम्॥ तथा च योग्यमेव कृष्णप्रसादभैषज्यं कृतमिति भावः॥ आद्यन्ताभावस्य सर्वसाधारण्यात् किं चोद्यमित्युच्यत इत्यतः श्रीमन् इत्याद्युक्तम्॥ श्रीमन् इत्यधिकारिसम्बोधनम्। चोद्यमिति मया अनृतं नोच्यते। कथं नानृतमित्यतः को मृतिमित्युक्तम्॥ मृतिमित्युपलक्षणया जनिरपि गृह्यते॥ तथा च लोके मां ऋते को मृतिं जनिं च नानुयाति मे तं वदस्व, न कोपि यत अतो जनिमृत्यभावस्य साधारण्याभावात् तं च मम कृतवानिति चोद्यमित्युक्तं नानृतमिति भावः। श्रीगुरुराजानां ऋजुत्वात् 'निष्कासयन् परमसौ भगवान् विवेश' इत्युक्तरीत्या श्रीमदाचार्याणां अवतारवत् लोकजनिविलक्षणमवतरणमङ्गी-करणीयम्॥ सशरीराणां वृन्दावने प्रवेशश्च ऐतिह्यसिद्धः। तथाच लोकसाधारण देहयोग लक्षण जनिमृती श्रीगुरुराजानां श्रीमदाचार्यवन्नस्त इति ज्ञातव्यमित्येवमादीनि प्रमेयाण्यस्मिन्नध्याये भाष्यन्ते॥

एवमष्टमे अध्याये 'तुङ्गभद्रानदीतीरे गङ्गासङ्गात् सुपुण्यदे। मङ्गलार्थं पितॄणां च स्वां गां द्वादशनिष्कदां॥ दत्तवान् वित्तपूर्वं मे मत्तोऽपि स्वहितोऽपि च' इत्यनेन कश्चन भक्तः श्रीगुरुराजानां भूमिं दत्तवानित्युच्यते॥ एतादृश द्वादशनिष्कद भूमिदानं तु तुङ्गभद्रातीरे तीर्थराज पुरनिकटे वृन्दावनाचार्यद्वारा श्रीगुरुराजानामत्रोक्त लक्षणकेन केनचिद्भक्तेन कृतमिति

सर्वप्रत्यक्षसिद्धम्॥ अत्र भूदा(तृः) तुर्मत्तत्वं विद्याधनाभ्यां स्वहितत्वं सन्देहहितकर्तृत्वं विवक्षितं ज्ञेयम्॥

तथा 'हिमवत्पर्वतं गत्वा सुमहत्पर्वणि स्फुटम्॥ आगमं पर्वतस्योर्ध्वमनमत्पर्वतोऽपि माम्॥ तद्धस्तोपरि मद्धस्तमदिरोप्यादरेण च॥ ऋद्धिमद्धिमवद्देहमारुहं बृहदुन्नतम्॥ तेन सम्पूजितश्चाहं मेनकासंयुतेन च' इत्यनेन हिमवत्पर्वतं प्रति गमनं पर्वताभिमानिदेवेन श्रीगुरुराजानां पूजनं च जातमिति। तथा'मद्विमानमथाकाशे निमिषार्धेन च द्रुतम्। विरिञ्च लोकपर्यन्तं धावतीत्यधिरोप्य माम्॥' इत्यादिन गुरुराजानां विमानेन देवलोकसञ्चरणमहिमा चोच्यते॥

तथा 'अहं नक्षत्रमध्यस्थः सुक्षेत्राणि प्रकाशयन्॥ तत् क्षेत्रवासिनः सर्वे भिक्षामात्रं ददुश्चमे॥ इति तेषां वदन्नित्यं तन्मद्यस्थो भवामि च॥ मत्तेजसा तिरस्कारः सर्वेषां तेजसामभूत्॥ यथा सूर्यप्रकाशेन तेजसां च तिरस्कृतिः॥ स्यात्पश्यतां च नेत्राणि मुष्णन् विष्ण्वाज्ञया सदा॥'इत्यनेन श्रीगुरुराजानां नक्षत्रमण्डलस्थत्वं, गुरुराजतेजसा सर्वतेजसां तिरस्कारश्च भवतीत्यादिकं प्रमेयमस्मिन्नध्याये प्रतिपादितम्॥

नवमे 'मां प्रौढभक्तिसम्बूर्णमारोप्य गरुडोपरि। जगाम निमिषार्धेन मेरुमूर्ध्नि स्वमन्दिरम्॥ तस्मान्मन्दरगं प्राप सुन्दरं स्वस्य विग्रहम्॥'तस्मादपि ययौ श्वेतद्वीपं मामधिरोप्य च॥ पीताम्बरधरः स्रग्वी श्रीपतिः श्रेयसां पतिः॥ श्वेतद्वीपादपि प्राप प्लक्षद्वीपं सुपावनम्॥ अपाम्पतेश्चोककण्ठे विपतेश्चावरोप्य माम्॥ गरुत्मानं समाहूय मानयन्निदमब्रवीत्॥ मघोनामृतमानीय मामकस्य मुनेर्दिश। इत्युक्तः स तु नत्वा च वैनतेयो विहायसा॥ गत्वा स्वर्गपतेस्तच्च ह्यमृतं प्राप सत्वरः॥ आदाय गरुडः प्रौढश्चोड्डीयोड्डीय पक्षिराट्॥ आढकेन मितं षोढा प्ररूढं पौरटस्थितम्॥ पाययामास मां पापरहितं पिहितं करे॥ स्थापयामास पादाग्रे श्रीपतेः शेषितं च यत्॥ दिव्यं तदपि गोविन्दो गोदोहनकरेण च॥ मां गोसवे गोसवे च पाययामास नेतरम्॥ ममामृतप्राशनं च ये श्रुण्वन्ति नरा भुवि॥ अमृतप्राशनं कृत्वा त्वमृतत्वं भजन्ति ते॥' इत्यनेन हरिः श्रीगुरुराजान् गरुडोपरि समारोप्य मेर्वादिस्थ स्वसद्म निन्ये गुरुराजान् अमृतं च पाययामासेत्यादिकम्।

तथा 'इन्द्राणी मां समानीय चेन्द्रेण सह मन्दिरम्। उपेन्द्रोपि तदा चाप्तश्चेन्द्रेण सह चेक्षितुम्॥ भद्रादेवी समायुक्तः स्वभद्रार्थं तदैव माम्॥ भद्रासने समारोप्य भद्रामारार्तिकां व्यधात्॥

अरुन्धती समायुक्ता वृन्दावने कृतिं त्विमाम्॥ स्वमन्दिरे समाधाय चेन्द्रेण सह चार्चयत्॥ एवं सर्वाश्च देव्यास्ताः पतिभिस्सहमन्दिरम्॥ मां समानीय चानर्चुर्वृन्दावन कृतिंत्विमाम्॥ तस्यात्स्वमन्दिरे सर्वे वृन्दावनकृतेः परम्॥ प्रकुर्वन्त्वर्चनं सम्यगारात्र्याँच्च समन्वितम्॥' इत्यनेन शच्यादि देवीभिः स्वस्वमङ्गलार्थं स्वस्वमन्दिरे वृन्दावनाख्यानस्य गुरुराजैः सह पूजा अकारि॥ तस्मात् लोके सर्वैरपि वृन्दावनाख्यानस्य पूजा कार्येत्यादिकं चोच्यते॥

किं च 'आचार्येष्वपि तेष्वत्र मध्वाचार्यः परोमतः॥ वेदेषु सर्वेषु हरिः सुरोत्तमः पूर्वेष्वर्थाचार्यमतेषु तन्मतम्। गुरुष्वपीह प्रवरेषु गौरवात् पूर्णप्रज्ञः सर्वशास्त्रेषु तद्वाक्' इत्यनेन श्रीमदाचार्याणां परमाचार्यत्वं तन्मतस्योत्तमत्वं च निरूप्यते॥ तथा'अहं ब्रह्मास्म्यहं ब्रह्मास्मीति यो वक्ति हिंसकः॥ स्वहिंसां ब्राह्मण ब्रह्मण्यारोपयति नान्यथा॥' इत्यादिना अद्वैतमतस्य पापसाधनत्वमुच्यत इत्यादीनि बहूनि रहस्यानि निगदितान्यस्मिन्नध्याये॥

दशमे 'गणैः स नारायणभूतनाथः समन्वितः कर्णविकर्ण संज्ञैः॥ महामणीनां बहुलैः सुकीर्णमौलिं ददौ मे शिरसि स्थिरोभूत्॥ कुबेरकोशादानीतं शोकापनुदकामदम्॥ दत्तवान् वित्तहीनं मे भूतनाथः प्रतापवान्॥ कुबेरो दत्तवान् नारायणभूतस्य हस्तके॥ सोपि मे शिरसि प्रोतं चकार श्रुणु पोतक' इत्यनेन भाविरुद्रपदाधिकारिणा नारायण भूतेन कुबेरकोशादानीय श्रीगुरुराजानां मौळिर्दत्त इत्यभिधीयते॥ नारायणभूतस्य रुद्रपदाधिकारित्वं तु कर्णविकर्णगणसेवितत्वेन भूतनाथपदवाच्यत्वेन च ज्ञेयम्॥ तता आधुनिकरुद्रत्वे मानाभावाद्वावि-मुख्यसमीर श्रीगुरुपरिवारतया स्थितस्य भूतनाथस्य भाविरुद्रपदाधिकारित्वस्य चौचित्यात् तथैव निर्णयः ज्ञेयः। नारायण भूतस्य पिशाचचर्यावत् चर्या दृश्यते। सा च 'पिशाचचर्यामचरद्रुद्रोवैविष्ण्वनुज्ञया।' इति पुराणवचनानुसारेण रुद्रस्य पिशाच चर्यावत् चर्या वा स्यात् नारायणभूतसम्बन्धि प्रमथगणचर्यावेति न कश्चिद्विरोधः॥

किं च 'वृन्दावने च देवानां वृन्दाः सन्तीह नन्दन॥ मुकुन्दपादपद्मं ते विन्दन्त्यनिशमञ्जसा॥ ब्रह्मा ब्रह्मभवः शक्रो वक्रतुण्डः सुरेश्वरः॥ गरुडः शेषभाष्यज्ञः सशेषः सोमभास्करौ॥ मित्रावरुणकारुण्य विषयाश्च विशेषतः॥ सुत्रामशरणं प्राप्ताः पूषापिष्टादनस्तथा॥ एते चान्ये च बहवो बहुमान पुरस्सराः॥ कुहेयोगे च सुहुतमग्निं कृत्वा धनं ददुः॥ ब्राह्मणेभ्यश्च सौपर्णश्रुतिज्ञेभ्यश्च पर्वणि॥ ब्रह्मणा सह पुण्याहे सस्त्रुर्धवलवारिणि॥ करं स्वैरं विरञ्चादि ऋभवो

रत्नसञ्चयान्॥ वृन्दावने च ववृषुः हर्षपूर्णाः सहस्रशः’ इत्यादिना गुरुराजवृन्दावने सर्वेषां देवावां सन्निधानं वर्तते॥ ब्रह्मादयः सर्वेपि पर्वकाले श्रीहरिपूजां अग्नौ कृत्वा धवळगङ्गास्नानं चक्रुः। वृन्दावने च करं ददुरित्यादि महामहिमा चोच्यते। अत्र ब्रह्मणा (सह) करसमर्पणं समेषु श्रीगुरुराजेषु स्नेहेन कृतमिति ज्ञातव्यम्॥

‘स्नानार्थं गच्छतां स्नायुबन्धनादिविनाशनम्॥ शिश्नात् कृतैनसां नाशं करोति प्रश्नमात्रतः॥ एवं विधास्मत्कृत वैभवान्विता भूदेवदेवैर्नरदेवपूजिता॥ कृतान्तमार्गं त्ववगाहनोत्सुकान् सन्तारयत्यैव हरेः सुतान्विता॥ एतच्छित्रं कलिमलैः कलुषीकृतमानसाः॥ न जानन्ति नराः सर्वे कलौ भूतलवासिनः॥ एवं मद्वृन्दावनस्य सद्वृन्दा एव भूतले॥ जानन्त्यनन्तमाहात्म्यं नेतरे पापपूरुषाः॥’ इत्यादिना धवलगङ्गास्नानं महापापपरिहारकम्॥ पापिष्ठा अस्य माहात्म्यं न जानन्ति॥ एवमेव श्रीवृन्दावनमाहात्म्यमपि पापिष्ठा न जानन्तीत्यादिकमब्रवीत्॥ तथा ‘नैवेद्यं मृष्टमन्नं मे यावन्न क्रियते द्विज॥ तावत्कुरुष्व त्वं नक्तव्रतं निरशनं मम॥ भुङ्क्ष्वा विप्र प्रसन्नोऽस्मि व्रतादनशनात्तव॥ व्रतेनानेन निष्पापस्त्वमभूर्नात्र संशयः’ इत्यनेन स्वप्नद्रष्टृब्राह्मणेन निरशनव्रतं कर्तव्यमित्यादिकं चोच्यते॥ इदं तु ब्राह्मणस्य जन्मान्तरे विश्वप्रियतीर्थात्मक वृन्दावनाचार्यत्वदशायां दृष्टम्॥

‘वेदवेद्य मम वेदकोविदः कोविदत्वमिह को नरो भुवि॥ त्वन्मुखेनतु जयामि मायिनं प्रीणयामि कमलापतिं हरिम्॥ वेदवेद्य तव वेदकोविदः कोविदत्वमिह को नरो भुवि॥ जय मदान्धपरवादिदन्तिनं सिंहविक्रममदीरितयुक्तिभिः॥ कुरु सुमध्वसमयस्य निर्णयं मत्प्रसादविभवाप्तसुमत्या॥ तोषयस्व सुजनांश्चमायिनः खेदयस्य परमात्मभाविनः॥’इत्यनेन श्रीगुरुराजैः श्रीवेदवेद्यस्वामिनां स्वात्मवत् ऋजुमात्रवेद्यगुणवत्वेन स्वसाम्यमुच्यते॥ तथा चेत्थं योजना॥ हे वेदवेद्य मम कोविदत्वं भुवि कोविदः को नरो वेद, न कोपि, किन्तु क एव वेद। ब्रह्मपदयोग्ये ऋजुरेव वेद, इति क इत्यस्यावृत्त्यायोजना, एवमेव वेदवेद्यपक्षेप्युत्तरार्धस्य योजना ज्ञेया॥ अत्र चातुर्यलक्षणगुणस्यान्यैर्दुर्विज्ञेयत्व कथनेन, लक्षणया वा स्थालीपुलाकन्यायेन वा सर्वगुणानामपि इतरावेद्यत्वे सति ऋजुमात्र वेद्यत्वलाभात् तादृशगुणवत्त्वेन श्रीगुरुराजानां वेदव्यद्य श्रीमच्चरणानां च साम्यं ज्ञेयम्, इत्यादीनि प्रमेयानि निरूपितान्यस्मिन्नध्याये॥10॥

एकादशे तु ‘ध्वजस्तम्भो द्विजश्रेष्ठ भुजस्तम्भे हृतोमया’ इत्यादिना ध्वजस्तम्भः श्रीगुरुराजैर्धृत

इत्यादिकमुच्यते॥ ध्वजस्तम्भधारणं तु सोदापुर्यां त्रिविक्रमालयाग्रस्थशिलाध्वजस्तम्भस्य बहुवारं स्थापनेपि पुनःपुनः पाते अथ तस्मिन् (हंसवाहन) गुरुराजप्रतिमाकरणे स्थितो भवतीति स्वप्ने सति तदनुसारेण हंसयुक्तगुरुराजप्रतिमाकरणनन्तरं स्थितोभवदिति ऐतिह्यसिद्धम्॥ एतदभिप्रायेणैवेदं पद्यं प्रवृत्तमिति ज्ञातव्यम्॥11॥ तथा द्वादशे अध्याये 'मद्दत्ताचार्यनाम्ना तु यः कश्चिद्वा नराधमः॥ ब्रह्मणं न भणत्यन्त्यः कुणपेन किमन्तरम्॥ वृन्दावनपदोपेत तन्नाम्नैवाह्वयन्त्विमम्॥ ये चेमं न भणन्त्यन्त्याः ते च मद्द्रोहिणः सदा॥'इत्यनेन स्वप्नद्रष्टृ ब्राह्मणस्य श्रीगुरुराजदत्त वृन्दावनाचार्यनाम्ना अव्यवहरणे गुरुराजद्रोहित्वं भवतीति निरूप्यते॥

तथा 'सत्यं सत्यं पुनः सत्यं त्रिवाचापि मयोच्यते॥ विप्रान्तर्यामिणा चेयं सत्कृतिश्च मया कृता' इत्यनेनेदमाख्यानं विप्रान्तर्गतश्रीगुरुराजैरेव कृतमिति शपथपूर्वकं निरूप्यते॥ किञ्च 'स्वप्नसत्यत्ववादेन जेतुमिच्छन्तिवादिनम्॥ ये तत्ववादिनः सर्वेत्वङ्गीकुर्वन्तु मत्कृतिम्' इत्यस्मिन् श्लोके 'यद्वापि ब्राह्मणो ब्रूयात् देवता वृषभोपि वा॥ स्वप्नस्थमथवा राजा तत् तथैव भविष्यति' इति भाष्योक्तदिशा, स्वप्नसत्यत्ववादिभिः सर्वैरपि स्वप्नस्यास्याख्यानस्य सत्यत्वमङ्गीकरणीयमित्यपि जगादेत्यादिबहूनि प्रमेयाणि निरूपितान्यस्मिन्नध्याये॥12॥

तथा त्रयोदशेऽध्याये 'आचार्यशब्दप्रवृत्तौ निमित्तं चास्ति ब्राह्मणे॥ ममापूर्व गुणानां च (तु) प्रवक्तृत्वं दिनेदिने॥' इत्यनेन स्वप्नद्रष्टृ ब्राह्मणस्य वृन्दावनाचार्यशब्दप्रवृत्तिनिमित्तमुच्यते॥ एवमादीनि प्रमेयाण्यस्मिन्नध्याये चोदितानि॥

तथा चतुर्दशेऽध्याये 'योज्यानिपूज्य सत्पुत्ररागद्वेषौ च नैव मे' इत्यादिना गुरुराजानां रागद्वेषाभाव उच्यते॥'हे केशव त्वं तोकस्य स्मारकः प्रेरको भव'॥'ज्ञानवैराग्यभक्त्याख्यसखिभिः सुखमेव च॥ प्राप्नुयां स्वाप्नपद्यैर्मे चाप्नुयाच्छोभनं नरः॥ इत्यहं देवदेवेशं वेदे वेदे च संस्तुतिम्॥ कृत्वा कृत्वा प्रार्थयामि दृष्ट्वा दृष्ट्वा तमव्ययम्'॥ इत्यनेन, श्रीमदाख्यानेन भक्तानां शुभं भवेदिति श्रीहरिं प्रति श्रीगुरुराजैः प्राथ्यर्त इत्यादीनि जगादास्मिन्नध्याये॥14॥

तथा पञ्चदशे'सीतापते मम सुतस्य कृतार्थतां च श्रुत्वा तु मत्कृतिशतैर्विततार्थ पूतैः॥ सन्तोषसन्ततिमथ प्रथयाद्य लोके त्वत्तोषतस्तदितरेपि सन्तोषिताः स्युः' इत्यादिना सीतापतिनामकभक्तकेन कर्तव्यमुक्त्वा तस्मिन् एव प्रकरणे 'मद्रङ्गिते च हृदये वरदं हरिं तं

संस्थापयाद्य सदनं मदनाभिरामम्॥ मन्मन्त्रतन्त्रविधिभिः कुरु वारिधौ यः शेते च शेषशयने परमस्य पूजाम्॥ एवं तद्ध्यानमानेन गानं कुरु गुरूदितम्॥ मा संसारभयं धीर वरदोस्मि तवादरात्॥' इत्यनेन श्रीगुरुराज सन्निधानवद्धृदये शेषासनं हरिं सम्पूजय॥ तव संसारभयं न भवतीति सीतापतिं प्रत्युच्यते॥ संसारभयपरिहारार्थं हृदयस्थश्रीशेषासनम् पूजय इति भावः॥ अत्र सदन शब्देन सन् अनो मुख्यप्राणः पूजकत्वेन यस्येति व्युत्पत्त्या मुख्यप्राणावतराभूत श्रीमदाचार्य पूजितः शेषासनो विवक्षितः॥ तादृश हरिपूजा महिम्ना तुर्याश्रमस्य प्राप्तत्वात् संसारभीतिस्तेन परिगतेति ज्ञातव्यम्॥ एवमादीनि रहस्यान्युदितान्यस्मिन्नध्याये॥15॥

षोडशेऽध्याये 'पूर्वन्तु भट्टार्यस्य भ्रष्टबुद्धेः कदाचन॥ नष्टासीत् दृष्टिरेकैव वेदाप्रामाण्यशङ्कया॥ तद्वत्कमलनाभस्य समलस्य सुदुर्मतेः॥ शमनं चास सन्नेत्रं दमनं यास्यते यमात्॥ अयं न तम्मणः प्रेम्णा मद्वाणीं भणते गुणिन्॥ काणवत् सरणीं यायान्नाणते पूर्णरूपिणम्॥ तत्फलं प्राप्स्यते पुत्र सत्फलं नैव पश्यति॥ विप्रफल्गुतरश्चायं विप्रलिप्सुर्न संशयः॥ अनेकरूपवन्तं मां विनैकतररूपिम्॥ मनाक् स मनुते विद्वान् शौनको भुवि जायते॥ एवं निःश्रीनिवासोयं श्रीनिवासोभिधोपि सन्॥ निःसीमं मां न मनुते सुश्रीमन्तं कदाचन॥ नित्यं ब्राह्मण सम्बन्धि सत्यं वाक्यं मयोदितम्॥ अत्यन्तं भ्रान्तबुद्धिश्च मन्तव्या तेन मत्कृतिः॥' इत्यनेन कमलनाभादीनां त्रयाणां मध्ये कमलनाभस्य श्रीमदाख्यानाप्रामाण्यशङ्कया वेदाप्रामाण्यशङ्कया भट्टाचार्यस्येव दृष्टिर्नष्टा आसीत्॥यमेन निगृहीतश्च भवति॥ तम्मणस्तु अत्यल्पः, कमलनाभवत् श्रीमदाख्यानं न भणते॥ यमसरणीं च प्राप्नोति॥ अनेकरूपत्वादिमन्माहात्म्यं न जानाति॥ तेन शुनकः सन् भुवि जायते॥ तथा श्रीनिवासोऽपि महाभाग्यवन्तं महासामर्थ्यवन्तं च न जानाति॥ स च दरिद्रो भ्रान्तबुद्धिश्चेत्यादिकमुच्यते। तथा च श्रीगुरुराजाभक्ताग्रेसराणां कमलनाभादि त्रयाणां पद्मनाभनामवत्त्वे सति नष्टदृष्टित्वादीनि तम्मणनामवत्वे सत्यतीव विप्रलम्भकत्वादीनि वेङ्कटरमणनामवत्वे सति भ्रान्तबुद्धित्वादीनि लक्षणानि क्रमेण तत्तद्व्यक्तिज्ञानार्थमुदितानि वेदितव्यानि॥ तानि च लक्षणानि तत्तद्व्यक्ति परीक्षकाणामानुभाविकानीति॥ तथा 'तवोत्तमसतीसूतिकाले चित्रं कृतं मया॥ पूर्वोक्तवाक्यसत्यार्थं सा पुत्री पुत्रकः कृतः' इत्यस्मिन् श्लोके पुत्रीत्वेन गर्भेभिवृद्धस्य कस्यचिद्भक्तस्य शिशोः पुत्रत्वेन करणलक्षणाघटितघटनाशक्तिः श्रीगुरुराजानामुच्यते॥ एवमादीनि प्रमेयाण्यस्मिन्नध्याये निरूपितानीति॥16॥

तथा सप्तदशेऽध्याये 'संसाराब्धेश्च यन्नेतृहोतृवत् कर्मवारिधेः॥ क्षेत्रवत् पुत्रपौत्राणां नेत्रं सज्ज्ञानमुच्यते॥ तन्नष्टमासीद् भ्रष्टे च शिष्टवल्लोकवञ्चके। तर्हिभट्टस्य दृष्टान्ते दार्ष्टान्तिकविरुद्धता॥ इति चेन्नच तत्रापि दृष्टिशब्देन सौष्ठवात्॥ विठ्ठलज्ञानमेवाग्र्यं स्पष्टं ग्राह्यं न संशयः॥ उभयाभिप्रायतश्च नेत्र शब्दार्थ उच्यते'॥ इत्यनेन 'पूर्वाध्यायोक्तकमलनाभव्यक्तिज्ञानार्थं पुनरपि लक्षणमुच्यते॥' तथा चेत्थं योजना॥ संसाराब्देः संसारसमुद्रात् यत् यस्मात् सज्ज्ञानं नेतृनयनकर्तृतारकमितियावत्। कर्मवारिधेः होतृवत् नेतृफलीकरणेन प्रवर्तकं, पुत्रपौत्राणां क्षेत्रवत् कलत्रवत् नेतृप्रवर्तकम्॥ यथा कलत्रं पोषणादिना पुत्रादिप्रवर्तकं, तद्वत् इदमपि पुत्रादिदुरित निवारणद्वारा तत्प्रवर्तकमिति भावः॥ तस्मादेतादृशं ज्ञानं पूर्वाध्याये कमलनाभप्रकरणे 'शमनं चास सन्नेत्रं' इत्यत्र नेत्रमिति शब्देनोच्यते॥ तादृशं च ज्ञानं यतिवेषणधारण सच्छास्त्रपठनादिना च शिष्टवत् प्रदर्श्य लोकवञ्चके अन्तःज्ञानभक्त्यादि भ्रष्टे कमलनाभे नष्टमासीत्॥ कालमहिम्ना सर्वेषामपि ज्ञानशून्यत्वात् किं विशिष्य अभिधीयत इत्यतो विठ्ठलज्ञानग्राह्यमित्युक्तम्॥

तस्य विठ्ठलज्ञाननाशो नाम मदुपास्यो विठ्ठलः श्रीगुरुराजैः प्रतिष्ठितः इत्याकारक ज्ञाननाशो विवक्षितः॥ नाशस्त्वकार्यकारित्वात् नष्टप्रायत्वम्। तदपि तादृशज्ञान विषयीभूतविठ्ठलप्रतिमादातृषु श्रीगुरुराजेषु, तत्प्रीत्यास्पदेषु वृन्दावनाचार्यप्रभृतिषु च कमलनाभस्य द्रोहित्वेन 'अवज्ञाता गुरूणां च देवतानां न सिध्यति' इत्युक्तरीत्येति ज्ञातव्यम्॥ प्रतिमोपासकस्य प्रतिमादातृषु भक्तिपूर्वकमियं प्रतिमैभिर्दत्तेत्याकारकज्ञानस्यैव कार्यकारित्वादिति भावः॥ अत्रेत्थमैतिह्यम्॥ कमलनाभस्तु श्रीमदाचार्यसंस्थानयतिः॥ तत्संस्थानप्रतिमामठदाहकाले दग्धा॥ पुनः श्रीगुरुराजाः प्रतिमां निर्माय श्रीविठ्ठलसन्निधानं च कारयित्वा दत्तवन्त इति॥ यदि पूर्वाध्याये कमलनाभप्रकरणगत श्लोकस्थ नेत्रशब्दस्य ज्ञानमर्थः तर्हि तत्रोक्तरीत्या भट्टस्य दृष्टान्ते भावप्रधानोऽयं दृष्टान्तत्वे दार्ष्टन्तिकविरुद्धता दृष्टान्तस्य इति शेष इति चेन्न च तत्रापि दृष्टान्तेऽपि दृष्टिशब्देन सौष्ठवात् विठ्ठलज्ञानं ग्राह्यम्॥ भट्टस्य वेदप्रामाण्ये सन्देहात् समीचीन परमात्मज्ञानाभावेन तदेव दृष्टिशब्देन ग्राह्यमिति भावः। तर्हि केवलज्ञाननाश एव विवक्षितः किमित्यतः दृष्टान्तदार्ष्टान्तिकयोः चक्षुर्नाशोपि विवक्षित इति भावेनोक्तमुभयाभिप्रायप्रापकश्चेत्येवं योजना ज्ञेया॥ तथा च विठ्ठलज्ञानशून्य इत्यनेन सूचितं

श्रीगुरुराज प्रतिष्ठितश्रीविठ्ठलार्चकत्वेसति गुरराजद्रोहित्वरूपं तथा शिष्टवत् लोकवञ्चकत्वं च लक्षणमनेनोक्तमिति ज्ञातव्यम्॥

एवं लक्षण सूचनायैव सर्वज्ञशिरोमणि श्रीगुरुराजैः स्वायत्ते शब्द प्रयोगे श्रीकृष्णज्ञानमित्याद्यनुक्त्वा विठ्ठलज्ञानमिति प्रायोजीति॥ तथा 'हे तम्मण्ण श्रृणुष्वाद्य भणस्व त्वं गुणाधम॥ मद्वाणीं श्लोकसुश्रेणीं ब्राह्मणेन च वर्णिताम्॥ नो चेत्त्वां प्रतियास्यन्ति शीघ्रं तु यमकिङ्कराः॥ मद्रोहकरमाराद्वै शरणं व्रज मां ततः॥ रदनैर्लोहितश्मश्रुकरालवदनैरपि॥ दमनैर्भीषयन्तस्त्वां दमनैर्भ्रष्टमानसम्॥ तदा मोचक एवाहं सूचकैरिति दोषिणम्॥ कीचकादतिदुर्बुद्धिशोचकं मामकं द्विजम्॥' इत्यनेन पूर्वाध्याये कमलनाभेन सहोक्तं तम्मण्णं प्रत्याख्यानपठनादिकं कुरु नोचेदतिभीषणैर्यमभटैराकृष्यस इति 'न चेत् प्रदास्यसि स्वयं रघूत्तमप्रियां तदा॥ सपुत्रमित्रबान्धवो विनाशमाशु यास्यसि' इति रावणं प्रति हनूमद्वाक्यमिव उचयते॥ 'अत्र प्रकरणे कीचकादतिदुर्बुद्धिं शोचकं मामकं द्विजं' इत्यनेन स्वप्नद्रष्टृब्राह्मणशोचकत्वलक्षणं तस्य तम्मणस्योच्यते॥

तथा 'हे विठ्ठल श्रेष्ठभृत्य पट्टभद्रस्य मे स्फुटम्॥ स्वेष्टं सुष्ठु करोषि त्वं ब्राह्मणेष्टं न चेष्टसे॥ ब्राह्मणोऽयं प्रेत्य जातस्त्वपमृत्युं हराम्यहम्॥ 'तस्याभीप्सितकृत्यं त्वं कुरु तच्च भवेन्मम॥ एवं चेदायुरारोग्यं स्यात् काये तव सर्वदा' इत्यारभ्य पूर्वाश्रमे विठ्ठलनामकस्वमठ स्वामिनः (केञ्चगारमठ) प्रतिस्वप्नद्रष्टृब्राह्मणस्येष्टं कुर्वित्युच्यते॥ तता चेत्थं योजना॥ हे विठ्ठल पट्टभद्रस्य मे श्रेष्ठ भृत्यः त्वं स्वेष्टं सुष्ठु करोषि ब्राह्मणस्येष्टं न चेष्टसे न करोषि। तस्याभीप्सितकृत्यं संस्थानदानलक्षणमभीष्टकृत्यं कुरु॥ तच्च ममाप्यभीष्टकृत्यं भवेत्॥ अत्राभीप्सितकृत्यमित्यस्य संस्थानदानलक्षणमभीष्टकृत्यमिति व्याख्यौचित्यादिति ज्ञातव्यम्॥ स्वप्नद्रष्टृब्राह्मणः पूर्वमेव मृतः किल॥ कस्येष्टं कर्तव्यमित्याकाङ्क्षायामुक्तं 'ब्राह्मणोऽयं प्रेत्य जात' इति॥ प्रेत्योत्पन्नस्य त्वत्समीपस्थस्य ब्राह्मणस्येष्टं कुर्विति भावः॥ अपमृत्युना पुनरपि मृतश्चेत् संस्थानदानमसार्थकं स्यादित्यत 'अपृत्युं हराम्यहं' इत्युक्तम्॥ एवं ब्राह्मणेष्टकरणस्य फलमाह॥ एवं चेदित्यादिनेति॥ इदं वचनं वृन्दावनाचार्यगुरून्प्रतीति ज्ञातव्यम्॥ एवमादीनि बहूनि प्रमेयाणि जगुरस्मिन्नध्याय इति॥17॥

तथा अष्टादशाध्याये 'अहं संयमनीं गत्वा दमनाय सुपापिनाम्॥ कमनीयं तु मां तेषां सुमनोभिः

समन्वितम्॥ दर्शयित्वा च तत्पापं कर्शयित्वा सुदर्शनैः॥ परशुच्छेदनं तेषां म(क)र्शयित्वा सुकर्शये॥ एवं संयमनीवासं दमनीयसुपापिनाम्॥ शमनाय तदा तेषां गमनाय मनस्त्वभूत्॥ यमोऽपि मां तदा प्राह त्वां ये निन्दन्ति मानवाः॥ तान्नैव मुञ्चामि धीमन् ब्रह्मकल्पक्षयेऽप्यहम्॥ वृन्दावनकृतौ चोक्तमहिमा घटते न ते॥इति ये कथयन्तीह न मुञ्चाम्याततायिनः' इत्यारभ्य पापिशिक्षणार्थं संयमनीं प्रतिगत गुरुराजान्प्रति, त्वां ये निन्दति, आख्यानोक्तमहिमा तव न घटत इति च ये वदन्ति, तान् कदापि न मुञ्चामि, इति यमेनोक्तमित्युच्यते॥ तता 'हे मौद्गलनारसिंह तव सन्ततसेवया॥ मा भूः कलत्रपुत्राणां हरिष्ये म्लेञ्छबन्धनम्' इत्यस्मिन् श्लोके मुद्गल नरसिंहदेवताकस्य कस्यचित् पुरुषस्य म्लेञ्छबन्धनिवारणं गुरुराजसेवयाऽभवदिति निगद्यते॥ इदं च पद्मनाभतीर्थश्रीमच्चरणसंस्थानीय सत्यधर्माख्यस्वामिनां पूर्वाश्रम विषयकम्॥ अतस्तेषां साक्षिसिद्धमिदं प्रमेयमित्यादीनि निरूपितान्यस्मिन्नध्याये॥18॥

तथैकोनविंशेऽध्याये 'ममैवं दैविकं ग्रन्थं हृदयग्रन्थिसंयुताः॥ ये न गृह्णन्ति तान् सर्वान् गृह्णन्ति यमकिङ्कराः॥ ममाख्यानप्रवक्तारं यमाज्ञयाऽगता भटाः॥ ते मया वारिताः सर्वे को वा मत्सदृशो यतिः॥' इति श्रीमदाख्यानं ये न स्वीकुर्वन्ति तान् यमकिङ्करा गृह्णन्ति॥ ये आख्यानं वदन्ति तान् प्रत्यागतानपि यमभटानहं निवारयामीथ्याख्यानमहिमा निगद्यते॥ किञ्च 'ब्राह्मणस्य कृतिश्चेयं नैव नैव मयोच्यते॥ दैवदैवं हयग्रीवो वेत्ति सर्वहृदन्तरम्॥ येत्वविश्वासिनः सर्वे मलीमस इति स्म ते॥ तस्माद् भूता भविष्यन्ते भस्मीभूता भविष्यते॥' इत्यारभ्य 'यान्ति कान्तिविहीनास्ते पापिनः शापिनो मम' इत्यनेन, आख्यानं गुरुराजैरेव कृतं, अत्र ये अविश्वासिनः तेषामतीवयातनावविषयत्वमिति प्रतिपाद्यते॥19॥

तथा विंशेऽध्याये 'सन्तप्तत्रपुपूर्णास्यं कृत्रिमेति वदन्ति ये॥ तप्तपाषाणपतनं तप्तमूषानिपातनं पुरीषापूरणं चास्ये महिषासनशासनात्॥' इति सार्धश्लोकेन इदमाख्यानं कृत्रिममिति ये वदन्ति तेषां यमशासन विषयत्वमुच्यते॥ किञ्च 'दीर्घग्रीवैर्भुक्तरम्भाफलैर्जिह्वाविदार्यते॥ तत्वद्भुक्तैर्मद्धनैश्च तज्जिह्वापि विदार्यते॥ यज्जिह्वा मत्कृतिं नैव वक्ष्यतीह परत्र च'॥ इति सार्धश्लोकेन श्रीगुरुराजद्रव्यहर्तृणामाख्यानावक्तृकाणां च जिह्वाविदारणमुच्यते॥तथा 'अहं त्रिलोकपूजितः कृतान्तलोकनायकः॥' इत्यनेन श्रीगुरुराजानां त्रिलोकपूजितत्वादिकमुच्यते॥ एवं बहुवारं श्रीमदाख्यानपठन अपठनयोः फलकथनं पठने दार्ढ्यार्थमिति ज्ञातव्यम्॥20॥

तथैकविंशत्यध्याये 'हे विद्वांस इह ध्वान्तवन्तं पश्यध्वमञ्जसा॥ कदध्वानं स्ववध्वा च मणिमद्वदनोदितम्॥ वदतेऽयं द्विजो मद्वाचार्याध्वानं विहाय च॥ अविद्वान् साध्वसं याति तद्वत् कमलनाभकः॥ मदन्तर्यामिणं ब्रह्माणं सवायुं विहाय च॥ ब्राह्मणोऽयं मणिमतो मतमाश्रित्य वर्तते॥ हयग्रीवाज्ञया वातविरिञ्चौ स्वे च वैभवम्॥ विना वाणीपतित्वं मे दत्तवन्तौ च किं वदे॥ यत्र प्रतीतार्थ बाधस्तत्रन्तर्यामिसङ्ग्रहः॥ कर्तव्य इति पूर्वोक्तमनुसन्दद्ध्वमञ्जसा॥ तस्मान्मयोक्तं सकलं लौकिकं वाप्यलौकिकम्॥ सत्यं सत्यवतां नाथ सुत तत्वमते कृतिम्॥ अयं कमलनाभश्च मयः स कलिरूपकः॥ स्मयकश्मलमाविष्टो विस्मयं न कुरु प्रिय॥ कलिः कमलनाभाख्यः पुनर्भूवलयेऽभवत्॥ मिलितः स्वस्त्रीयालक्ष्म्या या निर्माल्यं न मेऽगृहीत्॥ कलिर्मयश्च मणिमान् मिलित्वात्रय एव ते॥ 'कलहङ्कर्तुमुद्युक्ताः कुलायसदनाभिगाः॥ तन्निन्दावचनं श्रुत्वा सुनन्दन पुरो मम॥ नन्वन्धे पातयामुग्रे धुन्वंस्तं यमकिङ्करैः॥ तस्मात् शिखोपवीतार्हो नैव सोप्यतिगर्हितः॥ बहिष्कुरुत तं विप्रमसहिष्णुं ममोच्चयं॥' इत्यनेन मणिमदादिभिः कृत स्वप्नद्रष्टृब्राह्मणनिन्दाप्रकारस्तत्कृतनिन्दाया ब्राह्मणेऽलग्नत्वं च तथा कमलनाभादि व्यक्तिज्ञानार्थं तत्कृतकलहस्तत् स्वरूपं च निरूप्यते॥ तथा चेत्थं योजना हे विद्वांस इह मदीय ब्राह्मणविषये स्ववध्वा साकं मणिमद्वदनोदितं वध्वित्युपलक्षणं स्त्रीवदज्ञानिन ये तैश्च साकं मणिमता जल्पितं न तु विद्वन्निकट इति भावः॥ स्ववध्वसाकमित्यनेन स्त्रीसङ्गित्वं मणिमतः सूचयति॥ ध्वान्तवन्तं कदध्वानमन्धकारयुक्तकुमार्गसाधनं पश्यध्वं विजानथ॥ तेनोक्तं किमित्यत आह वदते अयमिति॥ अयमविद्वान् द्विजो वृन्दावनाचार्यो मध्वाचार्याध्वानं मध्वाचार्या सिद्धान्तमार्गं विहाय वदते॥ श्रीवादिराजस्वामिनां ब्रह्म वायु साम्यं वक्ति, तस्मात् साध्वसं यातीति मणिमद्वदनोदितमिति पूर्वेणान्वयः॥ कमलनाभः कोऽप्ययं ब्राह्मणो मणिमतो मतं जीवैक्यमतमाश्रित्य वर्तते॥ तस्मात् चतुर्मुखप्रतिपादकैः वायुप्रतिपादकैश्च मन्त्रादिभिः तदैक्याभिप्रायेण श्रीवादिराजगुरु स्तवनादिकं करोतीति तन्मन्त्रादिभिः स्तवनादिकर्तुः ब्राह्मणस्याभिप्रेतं मदन्तर्यामिणं सवायुं ब्रह्माणंच विहाय तन्मन्त्रादीनां ब्रह्मवायुविषयतां चाज्ञात्वा वदते॥ तदपि वचनं तद्वत् मणिमद्वचनवत् कदध्वानं जानथ॥

कथं भवतां ब्रह्मवायुसाम्यं येन साम्यकथकब्राह्मणदूषकाणां तमोयोग्यत्वं जानीम इत्यत उक्तम्॥ हयग्रीवाज्ञया इति॥ वातविरिञ्चावुत्तरत्र दीयमानं वाणीपतित्वं वैभवं, अत्र वाणीशब्दो

भारतीसरस्वतीपरः॥ तथा च भारतीपतित्वं वायुत्वं, सरस्वतीपतित्वं ब्रह्मत्वमिति भावः॥ तल्लक्षणं वैभवं विना, वैभवमित्यस्य वचनविपरिणामेनात्राप्यन्वयः, तथा च स्वे स्वसम्बन्धिनीवैभवे दत्तवन्तावित्यन्वयः॥ तस्मात् ब्रह्मवायु साम्यविषये किं वदे, वक्तव्यं नास्तीति भावः॥ वातविरिञ्चप्रतिपादकमन्त्रादिभिर्युष्मत् स्तवनकर्तुर्ब्राह्मणस्य भवदन्तर्यामिणौ वातविरिञ्चावभिप्रेतामित्युक्तम्॥ तत्राभिप्रायप्रकारस्तु कथमित्याकाङ्क्षायामुक्तम्॥ यत्रप्रतीतेति॥ तथाच तन्मन्त्रादिषु प्रतिपा(द्यं)दितं वाणीपतित्वादिकं मदन्तर्यामि ब्रह्मवायुविषयतयैवानुसन्धेयम्॥ यत् रुद्रादिसेव्यत्वादिकं तत् मद्विषयतयाप्यनुसन्धेयमिति भावः॥ एवं विदुषः प्रत्युक्तं प्रमेयं स्वशिष्यं ग्राहयति तस्मादिति॥ कृतिन् तत्वमते तत्वज्ञानिन् सत्ववतां नाथ यथार्थवचनवतां स्वामिन् हे सुत मयोक्तं लौकिकं वालौकिकं वापि वैभवं तस्मान्मम ब्रह्मवायुसाम्यात् सत्यं यथार्थं मय्युपपन्नमिति भावः॥ अत्र स्वशिष्यस्य यथार्थ वक्तृस्वामित्वोक्तिः तत्स्वामिकस्वप्नद्रष्टृ ब्राह्मणस्य यथार्थवक्तृत्व सूचनद्वारा तन्मुखेनोक्तस्वमहिम प्रतिपादकाख्यानस्य सत्यत्वोपपादनार्थं इति ज्ञातव्यम्॥

कमलनाभतम्मणश्रीनिवासनामतीवद्रोहित्वमुक्तम्॥ तादृशे द्रोहित्वे किं कारणमित्याकाङ्क्षायां तत्र निमित्तं स्वरूपमेवेति भावेन तेषां मध्ये तम्मण स्वरूपस्य 'हे विद्वांस' इत्यत्र निरूपितत्वात् कमलनाभश्रीनिवासयोः स्वरूपं निरूपयति॥ अयं कमलनाभश्चेति॥ अयं कमलनाभः कलिः॥ स्मयकश्मलमाविष्टः स्मयो विस्मयो भ्रान्तिबुद्धित्वं तन्निमित्तको यः कश्मलस्तं च प्राप्तः॥ श्रीनिवासाभिधः सकलरूपकोमयः लोकमय इत्यर्थः॥ तस्मात् तेषामसुरत्वात् विस्मयं न कुरु॥ मद्द्रोहित्व विषये आश्चर्यवान् मा भवेत्यर्थः॥ द्रोहककारणस्यासुरस्वभावत्वाद्विस्मयो न कार्यं इति भावः॥ कमलनाभाख्यः पुनः कमलनाभस्तु स्वस्त्रिया अलक्ष्म्या मिलितः सन् भूवलये भूमण्डले अभवत्॥ स्वस्त्रिया अलक्ष्म्या इत्यनेन स्त्रीसङ्गित्वं दारिद्र्यं च सूचयामास॥ कमलनाभादीनां व्यक्तिज्ञानार्थं पुनरपि विस्पष्टं लक्षणं तथा विक्षिप्योक्तं स्वरूपं च क्रोढीकृत्याह॥ कलिरिति॥ कलिः कमलनाभरूपः, मयः श्रीनिवासनामकरूपः, मणिमान् तम्मणरूपः॥ एते मिलित्वा कुलाय सदनाभिगाः सन्तः, नीडवत् अत्यल्पगृहविषयकेच्छावन्तः सन्तः कलहं बादरायणविषयकं कर्तुमुद्युक्ता उद्योगवन्त इत्यर्थः॥ एतेन गृहविषयकापेक्षानिमित्तेन श्रीबादरायण विषयककलहोद्योगकर्तृत्वं लक्षणं ज्ञेयमिति भावः॥

इदानीं मणिमदादीनां गुरुराजनिन्दाफलमाह॥ तन्निन्देति॥ मम तन्निन्दावचनं मद्विषयकं तस्य मणिमदातैतत् कर्तृकं यन्निन्दावचनं तत् श्रुत्वा हे सुनन्दनेति शिष्य सम्भोदनम्॥ तं मणिमदादिकं यमकिङ्करैः पुरो यमपुरात् धुन्वन् कम्पयन्सन् उग्रेन्धे पातयामि ननु॥ यस्मात् मन्निन्दकानां तमःप्राप्तिर्निश्चिता॥ तस्मात् यः कश्चित् विप्रकुलोत्पन्नोपि मम वैभवासहिष्णुः सः ब्राह्मण्यात् पतितो भवति इत्येवं योजना ज्ञेया॥

ननु हे विद्वांसः, इत्यत्र तम्मणनामग्रहणपूर्वकं तत् स्वरूपं न उच्यते, तत् कथं तम्मणो मणिमानिति निश्चीयत इति चेदुच्यते॥ षोडशाध्याये तावत् कमलनाभादीनां त्रयाणां प्रसक्तिः॥ अत्र तु हे विद्वांस इत्यादिना तेषां वृत्तान्ताभिधानम्॥ तत्रैव कमलनाभः कलिरिति नामग्रहणपूर्वकं कमलनाभस्य कलित्वं तथा स्मयकश्मलमाविष्टो मय इति श्रीनिवासधर्मतया अत्यन्तं भ्रान्तबुद्धिश्चेत्यत्रोक्तभ्रान्तबुद्धित्वरूपधर्मग्रहणेन गृहीतस्य श्रीनिवासनामकस्य मयत्वं च विधीयते॥ मणिमद्वदनोदितमित्यत्र कश्चन मणिमांश्च प्रतिपद्यते॥ उत्तरत्र कमलनाभादीनां व्यक्तिनिर्धारकलक्षणकथनपूर्वकोपसंहारवाक्ये कलिर्मयोमणिमानिति स्वरूप ग्रहण पूर्वकं गृहापेक्षानिमित्तबादरायण विषयक कलहोद्योग कर्तृत्वलक्षणं चाभिहितम्॥ तथा च पूर्वं गुरुराज द्रोहित्वेनकमलनाभादिनामवत्तया प्रसक्तानां त्रयाणां वृत्तान्तमुक्त्वा तन्मध्ये कमलनाभ श्रीनिवासयोः कमलनाभनामादिग्रहणपूर्वकं कलित्वं लोकमयत्वं चाभिधाय पुनः श्रीगुरुराज द्रोहकारणीभूत कलहोद्योग कर्तृत्वरूपधर्म कथन पूर्वकं 'कलिर्मयश्चमणिमानिति' तेषामुपसंहारान्मणिमानेव तम्मण इति परिशेषात् सेत्स्यति॥ तस्मात्, हे विद्वांस इत्यत्रोक्तो मणिमान् तम्मण इति निश्चिनुम इति॥

तथा 'परसौख्यं त्वन्मुखेन नरसौख्यं यथा च मे॥ सुरसौख्यं च मे सूर्यकरवच्च प्रकाशय' इत्यस्मिन् श्लोके स्वप्नद्रष्टृब्राह्मणस्य सुराचार्यत्वं नराचार्यत्वं चोच्यते॥ अस्य श्लोकस्य ब्राह्मण विषयत्वं पूर्वोत्तरश्लोकात् ज्ञायते॥ तथा चेत्थं योजना मे यथा च नरसौख्यं नरैः सम्पादित शास्त्रश्रवणादि सुकृतफलरूपं सुखं तव नराचार्यत्वात् त्वन्मुखेन त्वद्द्वारा॥ एवं सुराचार्यत्वात् सुरसौख्यञ्च मे त्वन्मुखेन भवति॥ यत एवं परसौख्यमन्यपुरुषसम्बन्धि सुकृत फलरूपं सौख्यं त्वद्द्वारा, अतस्त्वं सूर्यकरवत् प्रकाशय॥ सूर्यकिरणं यथा अन्धकारनिवारकमेवं त्वमपि तत्वोपदेशेन त्वदुद्दार्यस्याज्ञाननिवारको भवेत्यर्थः॥ तथा च 'तस्माच्छ्रुतं फलं तेषामाचार्याणां

महत्तरम्॥ ततो महत्तरं प्रोक्तं देवानामुत्तरोत्तरं' इति श्रीमद्भाष्योक्तदिशा 'ज्ञानदा अपि चाचार्या विशेषात्फलमाप्नुयुः॥ मुक्तावष्टगुणं शिष्यात् गुरुराप्नोति शोभनम्॥ तद्गुरुः द्विगुणं तस्मात्सार्धं तावत्ततोपरे॥ देवाः सहस्रगुणितं क्रमात्तस्माद्यथोत्तरम्॥ ब्रह्मा महौघगुणितमेवं फल विनिर्णयः॥' इत्यनुव्याख्यानोक्तप्रकारेण च स्वप्नद्रष्टृ ब्राह्मणोद्धार्यपुरुष सम्पादित सुकृतफलरूपं सुखं तेषां ज्ञानदातृ स्वप्नद्रष्टृब्राह्मण द्वारा श्रीगुरुराजानां भवतीति भावः॥ अत्र सूर्यवत् प्रकाशयेत्यनुक्त्वा सूर्यं करवच्छेत्युक्तिर्यथा प्रकाशनफलं किरणाभिमानिनामल्पं सूर्यस्य तु पूर्णम्। तथा प्रकृत ब्राह्मणोद्धार्यस्याज्ञाननिबर्हण फलमस्य ब्राह्मणस्य अल्पं, पूर्णन्तु विरिञ्च पदाधिकारिणां श्रीगुरुराजानामिति॥ इममर्थं सूचयितुमिति ज्ञातव्यम्॥

किञ्च 'हे वादिराजभट्टार्यनामधार उदार ते॥ सार्थकं कुरुषे जन्म पार्थवन्नात्र संशयः॥ वृन्दावनाचार्यनाम्नः पुत्रमित्रकलत्रकैः॥ सह तस्य गृहं दत्वा बृहत्कीर्तिमुपाददीः॥ प्रतापं तस्य दत्वा चामित्रतापं करोष्यहो॥ पत्रतापाख्यरुद्रोपि स्वप्रतापं जहाविह' इत्यनेन वृन्दावनाचार्याणां केनचिद्भक्तेन गृहदानं कृतं, तेन तस्य कीर्तिः, शत्रूणां सन्तापः, तथा कृत्रिम पत्रेण जनानां तापकारित्वात् पत्रताप इत्युक्तस्य कस्यचित् क्रूरस्य पूर्वोक्तगृहनिमित्तेनैव प्रतापभङ्गश्चाभूदित्यादिकं निरूप्यते॥ इदमेव गृहं कलिर्मयश्च मणिमानिति पूर्वोक्त कमलनाभाधिरूपकल्यादि कलहविषयभूतम्॥ एतद्विषयक कलहेनैव कलहकर्तुरत्रोक्त गुणविशिष्टस्य मणिमतः प्रतापभङ्गश्चाभूदितीदं प्रमेयं ह्यस्मदादिप्रत्यक्ष सिद्धम्॥ इदं च रजतपीठपुरे जातमिति सर्वलोकप्रसिद्धं चेति॥

किञ्च 'किं ते दास्यामि मद्दास्यं पूर्वमेव त्वमाददीः॥ तस्मान्मत्साम्यमेवेह चादत्स्वसुत सात्विक॥ मत्साम्ये च त्वयाप्राप्ते त्वत्समो नास्ति सत्सु च। तत्सतां सम्मतं सत्यं कुत्सितानामसम्मतम्॥ जगत्सत्यं तथा तत्ववादिनां न मृषात्मनाम्॥ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्॥ अपरस्परसम्भूतं किमन्यत् कामहैतुकम्॥ एतां दृष्टिमवष्टभ्य नष्टात्मनोऽल्पबुद्धयः॥ प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः॥ इति गीतोदितैः श्लोकैस्तोक वाक्काय कर्मभिः॥ लोक नाशकरूपाणां वारकत्वं निरूप्यते॥ तद्वत्तवोच्छ्रयं दृष्ट्वा ह्यसूयन्तेऽनसूयया॥ सह सर्वे मद्द्यान्ति ह्यभद्रं रौद्रमेव ते॥ तस्मात् त्वं मत्समो नित्यं कुत्सितानां भयानकः॥ वत्स त्वं सत्सु सम्पूज्यः शश्वदत्र परत्र च॥' इत्यनेन वेदवेद्यश्रीमच्चरणानां गुरुराजसाम्यं सतां सम्मतं, असतां चासम्मत

मित्यादिकमुच्यते॥ इत्यादीनि रहस्यान्यस्मिन्नध्याये निरूप्यन्ते॥21॥

तथा द्वाविंशेऽधाये 'लोकेऽप्यवैदिकसभे यास्यत्याभरणं धनम्' इत्यनेन वेदबाह्यानां सदसि मठीयाभरणं गच्छतीति निरूप्यते॥ इदं नगरनामकराजधान्यां जातमिति पूर्ववृत्तान्तज्ञानां वाक्येन सिद्धम्॥ तथा 'हरिः सर्वोत्तमो नित्यं गुरुद्वारा प्रसादकृत्॥ शिरसा धार्यतेस्याज्ञा विरिञ्चिहरपूर्वकैः॥ करोति सृष्टिं खलु लीलयैव हरत्यजस्रं सलीले स शेते॥ धरत्यमोघं खलु पालयंस्तत्सरत्यजस्रं खलु भक्तपालः॥ ब्रह्मन् ब्रह्मणि सन्तिष्ठन् सृष्टिं चास्य करोत्यहो॥ दध्रे स रुद्रदेहस्थः कोपं ताप हराय च॥ जडाज्जडमिदं चक्रे दृढाद्दृढमसौ हरिः॥ निबिडान्निबिडं भस्म वडवाद्वडवाग्निना॥ विष्णुर्जिष्णुः स्वयं चास्य करोति जगतां स्थितम्॥ पूष्णोन्तस्थः स्वयं कृष्णः स्वतेजोभिः प्रकाशकः॥ एवं मोक्षं स्वपक्षस्य मुक्षोः कुक्षिगस्य च॥ सपक्षिवाहनः कर्तुं दक्षः त्र्यक्षोऽपि न क्षमः॥ तत्पादं क्षालयित्वादौ स्वपदं प्राप्तवान्विधिः॥ तत्तीर्थं शिरसा धृत्वा शूली कैलासमाप च॥ शेषस्तच्छयनं भूत्वा ह्यशेषां वहते भुवम्॥ स्वशेषपदवीं याति सरोषं च जहाविह॥ वाहनो वैनतेयोऽभूत्तेन पुण्येन मानव॥ दानवान्तक नेत्राग्रे सर्वत्र वसतेऽनिशं॥ कृष्णः कण्ठमणिं कृत्वा ब्रह्माणं च गुणार्णवः॥ तत्पदं पारमेष्ठ्यं च प्रददौ प्रभुरव्ययः॥ एवं देवादिदेवश्च देवानां स्वस्य सेवया॥ ददाति पदवीं योग्यां माधवः स दयानिधिः॥ ममापि पादसेवया ददाति योग्यवैभवम्॥' इत्यनेन ब्रह्मादिषु स्थित्वा सृष्ट्यादिकर्ता श्रीहरिः ब्रह्मादीनां तत्तदीय सेवया सन्तुष्टः सन् तत्तद्योग्यां पदवीं यथा तदात्येवं ममापि पादसेवया सन्तुष्टः सन् मद्योग्यं वैभवं ददातीत्यादिकं निरूप्यते॥ एवमादीन्यनेकान् प्रमेयाण्यस्मिन्नध्याये निरूप्यन्त इति॥22॥

नच श्रीमद्वृन्दावनाख्यानप्रतिपाद्ये श्रीपरमात्मनः हयग्रीवाद्यनेकरूपैः श्रीगुरुराजवृन्दावन सन्निहितत्वाद्यनेकार्थे विरोधिमानं वरीवर्ति॥ प्रत्युत अत्रोक्त हरिसर्वोत्तमत्वादि विषये तथा मध्वमतस्याग्राह्यत्व विषये अन्यमतस्य हेयत्वाद्यनेकविषये च शास्त्रसम्मतिरस्त्येव, इति सच्छास्त्रानुयायित्वात् तदविरुद्धत्वाच्च श्रीमद्वृन्दावनाख्यानं प्रमाणमिति सिद्धम्॥ श्रीः॥

तथा च आदौ प्रथमाध्याये चिदानन्दाद्यनेकगुणविशिष्टस्य हयग्रीवाद्यनेकावतारात्मकस्य च श्रीहरेः मधुहन्तृत्वं, बहुरूपधारिण्या लक्ष्म्या सेव्यमानत्वादिकं, तथा अन्त्येपि द्वाविंशेऽध्याये ब्रह्मादिषु स्थित्वा सृष्ट्यादि कर्तृत्वादिमाहात्म्यं तथा मध्ये च नवमाध्याये

श्रीमदाचार्यमतस्योत्तमत्वमन्यमतस्य पापसाधनत्वं, तथा तृतीयाध्यायेषु श्रीमद्वादिराज गुरुचरणानां ऋजुगणस्तत्त्वं चेत्याद्यनेकागमिकार्थः प्रतिपाद्यन्ते॥

किञ्च प्रथमाध्याये रजतपीठपुरं प्रति मध्यवाटमठस्थ श्रीबादरायणागमनं भवेतीति। तथा द्वाविंशे स्वमठीयाभरणाद्यपहारो भविष्यतीति च प्रत्यक्ष सिद्धार्थस्य प्रतिपादनं क्रियते॥ तथैकविंशे श्रीगुरुराजद्वेषिणां प्रताप भङ्गकारणीभूत गृहलाभः। तथा तुङ्गभद्रानदीतीरे भूप्राप्तिरपि स्वमठस्य भवतीत्यादीनि बहुजनसाक्षिसिद्धप्रमेयाण्यपि निरूप्यन्ते॥ तथा पञ्चमे, द्वादशे, एकोनविंशे, विंशे चेवमाद्यध्यायेषु श्रीमदाख्यानस्य श्रीगुरुराज श्रीमच्चरणैरेव कृतत्वं वर्ण्यते॥ तस्मादागमिकप्रात्यक्षिकाद्यर्थानां प्रतिपादनात् परमाप्ततम श्रीमद्वादिराजगुरुचरणैरेव कृतत्वात् स्वाप्तत्वच्च सुप्रमाणभूते श्रीमद्वृन्दावनाख्याने विश्वासरहितानां पुरुषाणां, तृतीयाध्यायेषूक्तरीत्या आयुःक्षयकारत्वं पञ्चमोक्त गुरूपदेशनर्हत्वसम्पादकत्वादि माहात्म्यं च तथा नवमोक्तं शच्यादिदेवीभीरर्चितत्वादि महिमानं, चतुर्दशोक्तभक्ताभीष्ट हेतुत्वादिकं, तथैकोनविंशे, विंशेचैवमाद्याध्यायेषूक्तं श्रीमदाख्यानपठनादि कर्तॄणां यमशासनाविषयता सम्पादकद्वादिमाहात्म्यं च श्रीमद्वृन्दावनाख्यानस्यादावेव बुद्ध्वा, अथाऽस्मिन्नेवाख्याने बहुस्थलेषूक्तऋजुगणस्थत्वं, द्वितीयाध्यायोक्तं श्रीत्रिविक्रमरथोत्सवादि लक्षणसेवाकरणादिकं, तथा तृतीयोक्तं मन्त्रप्रतिपाद्यत्वं, वृन्दावनोपरिगत सौवर्णविमानवत्त्वं, मेर्वादिस्थभगवन्मूर्ति द्रष्टृत्वं तत्रतत्रत्यदेवैः पूज्यत्वादिकं तथा चतुर्थोक्तं मेरुस्थितहरिणा करस्पर्शादिलालनपूर्वकं पुत्रत्वेन रमाकरेप्रदतत्त्वादि माहात्म्यं, तथा पञ्चमोक्तं हरिदशावताररूपेण सह विहर्तृत्वादिकं, सूर्यमण्डलादितेजोमण्डलगन्तृत्वं, सर्वतेजस्तिरस्कारकतेजस्कत्वादिकं च, तथा षष्ठोक्तं नन्दनादिषु देवैर्मानितत्वं, नरकस्थजनोद्धर्तृत्वं, वायोरिव आयुःसाधनत्वेन स्वप्नद्रष्टृब्राह्मणशरीरस्थत्वादिमहिमानं, सप्तमोक्तं सत्यलोके श्रीहयग्रीवमुखेन सर्वश्रुत्यर्थावगन्तृत्वं, तथा कृष्णावतार काले हरिसेवालब्धजनिमरणाभाववत्त्वादिकं, तथा अष्टमोक्तं हिमवत्पर्वतगन्तृत्वं, तेन पर्वताभिमानिना पूजितत्वं, विमानेन देवलोकसञ्चरणं नक्षधत्रमण्डलस्थत्वादिकं च, तथा नवमोक्तामृतप्राशनादिकं, दशमे 'अहमानन्दमुनिना' इत्यादिना निगदितं श्रीमदानन्दमुनिना सह बदरिकाश्रमे श्रीवेदव्यासनमन, भजनादिकर्तृत्वादिमाहात्म्यं, तथैकादशे प्रोक्तं भुजेन ध्वजस्तम्भधारणादिकं, अपि च द्वादशाध्याये

'श्रीमद्वागीशसञ्जात' इत्यादिना निरूपितं स्वविषये अन्यथाज्ञानिनां यथार्थज्ञानिनां च अधमोत्तमलोकापादकत्वादि माहात्म्यं, 'अहं मद्भक्तवश्यश्च' इत्यादिना त्रयोदशोक्तं भक्तवश्यत्वादिकं, किं च 'हयग्रीवप्रसादोयमीदृशः' इत्यादिना चतुर्दशे कथितं श्रीहयग्रीव पूजासादिततत्प्रसादेन भवबन्धनिर्मुक्तत्वादि महिमानं, तथा पञ्चदशेध्याये 'श्रावय त्वं मम श्राव्यं' इत्यादिना प्रोक्तममृतोपमचारित्रवत्वादिकं, तथा षोडशे वर्णितं कस्यचिद्भक्तस्य पुत्र्याः पुत्रत्वेन करणलक्षणाघटितघटना सामर्थ्यादिकं च, 'तस्मादरागद्वेषोहं' इत्यत्र सप्तदशे निगदितं रागद्वेषोप लक्षिताशेषदोषराहित्यं, तथा अष्टादशोक्तं स्वनिन्दकानां यमशासनविषयतासम्पादकत्व माहात्म्यं, कस्यचिद्भक्तस्य मेञ्छबन्धकत्व निवारकत्वादिसामर्थ्यं च, अपि च 'माषमात्रं च मद्रोह' इत्यादिनैकोनविंशोक्तमणुमात्रस्वद्रोहिणां विष्णुद्रोहादि महादोष सम्पादकत्वादि शक्तिं, तथा विंशेऽध्याये प्रतिपादितं त्रिलोकपूजितत्वादि वैभवं 'अपां फेनेन नमुचेः' इत्यादिनैकविंशोक्तं दुर्वादिनिरसकत्वादि सामर्थ्यं, तथा द्वाविंशेऽध्याये 'हे विप्र मत्प्रसादेन' इत्यादिनोक्तं स्वानुगृहीतपुरुष पितृवर्गस्यापि स्वर्गादिदातृत्वादि माहात्म्यं चेत्येवमादि तत्र तत्रोक्त महिमाविशेषं च श्रीमद्वादिराजगुरुचरणानां ज्ञात्वा ...

---

तथा वेदवेद्यश्रीमच्चरणानामपि द्वितीयाध्यायोक्तं श्रीगुरुराजविमानसदृश विमानप्राप्तिसाधनभूत हरिसेवा कर्तृत्वमाहात्म्यं, ऋजुत्वेन श्रीगुरुराजसखित्वादिकं च, पञ्चमाध्यायोक्तं भक्ताभीष्टसिद्ध्यर्थं श्रीगुरुराजाविष्टत्वादिकं, दशमाध्यायोक्तं ऋजुमात्रवेद्यगुणवत्त्वादिकं, एकविंशत्यध्यायोक्तं श्रीगुरुराजसमानत्वं च ज्ञात्वा तथा श्रीभूतराजानां दशमाध्यायोक्तं महुरुद्रपदयोग्यं च निश्चित्य किं च स्वप्नद्रष्टृब्राह्मणधर्मतयैव द्वितीयाध्यायोक्तयोः नैरन्तर्येण मध्यवाटमठस्थ श्रीबादरायणार्चकत्व मखकारयितृत्वयोः, तथा चतुर्दशमोक्तयोः श्रीगुरुराजपादपीठाग्रतः सच्छास्त्रश्रवणादिकर्तृत्व निरशनकर्तृत्वरूप धर्मयोश्च...

---

सप्तदशाध्यायोक्तं श्रीगुरुराजसंस्थानीयानां पूर्वाश्रमे विठ्ठलनामकानां श्रीविश्वेशतीर्थश्रीमच्चरणानां करकमलसञ्जातेषु श्रीमद्विश्वप्रियतीर्थश्रीमच्छरणेषु दर्शनात् तेषां स्वप्नद्रष्टृब्राह्मणावतारत्वं विज्ञाय, चतुर्थाध्यायोक्तप्रकारेण अस्य ब्राह्मणस्य नाकिपदप्राप्तिर्यदर्चनाविनाभूतातादृशस्य मध्यवाटमठस्थस्य बादरायणस्य प्रथमोक्तप्रकारेण रजतपीठपुरं प्रत्यागमनद्वारत्वं च तेषामवगम्य तृतीय पञ्चमाध्यायेषूक्तमिन्द्रपदयोग्यत्वं, श्रीगुरुराजसन्निधानपात्रभूतशरीरत्वं, श्रीमदाख्यानं वक्तुं

श्रीगुरुराजाऽविष्टत्वादिकं च तथा द्वादशाध्यायोक्तं वृन्दावनाचार्यशब्दवाच्यत्,वं तच्छब्धप्रवृत्तिनिमित्तं च त्रयोदशाध्यायोक्तं बुद्धा, तथा धर्मशास्त्राद्युक्त गुरूपसत्तिप्रयोजकीभूतैकविंशत्यध्यायोक्त सुराचार्यत्व नराचार्यत्वे विदित्वा, किञ्च चतुर्थोक्तं तदवमानकरणस्य श्रीगुरुराजद्रोहकारणत्वं तथा द्वादशेऽध्याये 'वृन्दावनाचार्येति नाम्ना अव्यवहर्तुः श्रीगुरुराज द्रोहित्वोक्तेः, तन्नाम्नैव व्यवहार विषयतां च तेषामवबुद्धा यदुक्तं पञ्चदशाध्याय प्रसक्तानां शेषासनाधिरूढ श्रीपरमात्मोपासक सीतापत्याचार्याणां तथा केषाञ्चित् अन्येषामपि श्रीगुरुराजभक्तत्वं स्वप्नद्रष्टृविप्रोपकारत्वं तदपि विज्ञाय...

किञ्च षोडशाध्यायोक्तानां पद्मनाभनामवत्त्वे सति नष्टदृष्टित्वादिलक्षणवतां, तथा सप्तदशाध्यायोक्तानां श्रीगुरुराजप्रतिष्ठति विट्ठलप्रतिमार्चकत्वे सति श्रीगुरुराज द्रोहित्वादि लक्षणोपेतानां, तथैकविंशाध्याये प्रतिपादितानां गृहापेक्षनिमित्तक श्रीबादरायणविषयक कलहोद्योगकर्तृत्वरूपासाधारणधर्मवतां श्रीगुरुराजाभक्ताग्रेसराणां केषाञ्चत् रजतपीठपुरस्थकर्मन्दिनामेतदध्यायोक्तं कल्यादि स्वरूपत्वमौचित्यात् कल्यादिपदयोग्यत्वं वा निश्चित्य, अथवा कल्याद्याविष्टत्वं वा ज्ञात्वा, तथान्येषामपि केषाञ्चित् गुरुराजाभक्तत्वं चेत्येवमाद्याख्यानोक्त प्रमेयाण्यनुसन्धाय...

अथ स्वस्मरणमात्रेण पुरुषाणां शिश्ननिमित्तकाऽशेषपरवनितागमनादिपापनिवारकत्वादि दशमाध्यायाद्युक्त माहात्म्योपेत श्रीधवलगङ्गास्नानादिना शुद्धान्तःकरणाः सन्तः प्रथम, पञ्चम, दशमाध्यायेषूक्तरीत्या श्रीहयग्रीवाद्यात्मक श्रीहरिसन्निधानवत्त्वेन, तथा तीर्थक्षेत्र पर्वताद्यभिमानि देवता सन्निधानविशिष्टतया च सज्जनैकवेद्यत्वादि माहात्म्योपेतत्वेन चावगते श्रीमन्महावृन्दावने सन्निहितानामाख्यानोक्त भक्ताभक्ताद्यखिल सदसद्वर्गस्येष्टानिष्टप्रदातृणां श्रीमद्वादिराजगुरुचरणानां श्रीमदाख्यानोक्त ऋजुत्वादिगुणानुसन्धानपूर्वकं यथायोग्यसेवादिकर्तृणां पुरुषाणां तदनुग्रहद्वारा श्रीहरिप्रसादेनाखिलपुरुषार्थाः सिद्ध्यन्ति, अस्मिन्नर्थे न काप्यनुपपत्तिरिति॥ श्रीः॥

न च ब्रह्मादिदेवपदयोग्यानां कल्यादिपदयोग्यानं च सत्त्वे मानाभावः 'ब्रह्मत्वयोग्या ऋजवो नाम देवाः पृथग्गणाः॥ तैरेवाप्यं तत्पदं तु नैवान्यैः साधनैरपि॥ एवं सर्वपदानां तु योग्याः सन्ति पृथग्गणाः॥ तथा 'कलिर्दुःखादिकस्तेषु तेऽप्येवं ब्रह्मवद्गणाः॥ तथान्येप्यसुराः सर्वे गणा

योग्यतया सदा' इत्यादि प्रमाणानां दरीदृश्यमानत्वात्॥ नापि भाविमुख्यसमीरावतारभूत श्रीगुरुराजसेवायाः पुरुषार्थसाधनत्वं निर्मानमिति विवदितव्यम्॥ अगम्यत्वात् हरिस्तस्मिन्नाविष्टो मुक्तिदो भवेत्॥ नाति प्रसन्नहृदयो यद्द्यात् गुरुरप्यसौ॥ न तत् सत्यं भवेत्तस्मादर्चनीयो गुरुः सदा' इत्यादि प्रमाणानामानुभविकत्वात्॥ न च ऋजूनां गुरुत्वं तदुपदिष्टज्ञानस्य पुरुषार्थसाधनत्वं च निर्मूलमिति मन्तव्यम्॥ 'गुह्यादेशा ब्रह्मपदे ये योग्या देवतागणाः॥ सर्वे गुह्योपदेष्टारः सर्वेषां गुरुवो हि ते' इति छान्दोग्यभाष्यस्थवचनस्य, 'तस्माद्वायुत्वयोग्यैर्हि येषां लोकाः प्रकीर्तिताः॥ तेषामलोकशङ्काच नैव कार्य॥' इति बृहद्भाष्यवचनस्य 'अतो ब्रह्मपदे योग्या जीवा हंसाः प्रकीर्तिताः॥ तेषां परम्पराप्राप्तं यैर्ज्ञानं नियमेन तु॥ ते मुच्यन्ते न चैवान्ये' इति श्रुतिगीतातात्पर्यवचनस्य च ब्रह्मादिपदाधिकारिणां सर्वगुरुत्वस्य तदुपदिष्टज्ञानवतामेव पुरुषार्थभाक्त्वादेश्च प्रतिपादकस्य जागरूकत्वात्॥ न चान्तरेण गुरुसेवां ज्ञानोदयो भवतीति साचात्राप्याकूता (सा च अत्र अपि आकूते) इत्यलं पल्लवितेनेति॥ श्रीः॥

नन्वेवं व्याख्यानमनुपपन्नम्॥ तथात्वे श्रीमदाख्यानस्यैव अप्रामाण्यप्राप्तेः॥ तथाहि॥ अस्मिन्नाख्याने, स्वप्नद्रष्टृब्राह्मणस्येन्द्रपदादिकारित्वं तस्यैवेदानीं श्रीगुरुराजसंस्थानीय विश्वप्रियतीर्थश्रीमच्चरणात्मनाऽवतीर्णत्वमुच्यत इति निरूपितम्॥ इदं तावत् शोभां न बिभर्ति॥ यद्युपपादितरीत्या विश्वप्रियतीर्थश्रीमच्चरणानामिन्द्रपदाधिकारित्वं, तर्हि ते श्रीमदाचार्यमर्यादां तथा धर्मशास्त्रादिमार्गञ्च विहाय न प्रवर्तेरन्॥ तथा प्रवर्तमानाश्च दृश्यन्ते॥ तस्मान्नेन्द्रपदाधिकारिणः॥ तथा हि श्रीमदाचार्यैर्मध्यवाटमठे स्थापितां श्रीबादरायणमूर्तिं तन्मर्यादामुल्लङ्घ्यानीतवन्तः॥ तथा ब्रह्मचारिणामेव मठसंन्यासो देय इति श्रीमदाचार्यनियमं चात्यक्रामन्। किञ्च श्रीमदाचार्यसम्प्रदाय प्रवर्तकैः अनाश्रितं चैत्रादिमासं व्यत्ययं च कृत्वा चातुर्मास्यादिकमन्यथयन्ति॥ इदन्तु धर्मशास्त्रविरुद्धं च॥ इत्यादीनि बहूनि श्रीमदाचार्यसम्प्रदायविरुद्धाचरणानि दरीदृश्यन्ते॥ देवस्वभावानं च श्रीमदाचार्यमर्यादातिक्रमणं न युक्तम्॥ तस्मादुक्तमयुक्तमिति॥ किञ्चास्मिन्नेवाख्याने रजतपीठपुरस्थानां पद्मनाभादिकर्मन्दिनां कल्यादित्वं प्रतिपादितमित्यपि निरूपितम्॥ इदमप्यसमीचीनम्॥ श्रीमद्भाष्यादिप्रवचनकर्तॄणां श्रीकृष्णार्चकानां, तथा शास्त्रीयानेकधर्मकरणद्वार हरितोषकाणां चासुरत्वं शास्त्रविरुद्धम्॥ 'आचन्द्रार्कस्य पूजायै देवानाज्ञापयत् प्रभुः' इति पुराणवचने

श्रीकृष्णार्चकानां देवत्वोक्तेः॥ तथा 'महानन्दतीर्थस्य ये भाष्यभावं' इत्यस्मिन् मध्वविजयश्लोके भाष्यप्रवचनकर्तॄणां मुक्तियोग्यत्वकथनाच्च॥ मुक्तियोग्यत्वे चासुरत्वं नोपपद्यते॥ तस्मादेतादृशानां पद्मनाभादीनामसुरत्वमेतत्प्रमाणविरुद्धमिति॥ तथा चैतदर्थप्रतिपादकभागस्य सच्छास्त्रविरुद्धार्थत्वेनायुक्तार्थत्वेन चाप्रामाण्ये तद्दृष्टान्तेन सर्वस्याप्याख्यानस्या-प्रामाण्यमेवेति॥ तथा चास्मिन्नाख्याने प्रतिपादितः सर्वोऽप्यर्थोऽनुपपन्न इति॥

मैवं जानीथाः॥ मध्यवाटमठसमीपस्थस्य कस्यचित् ब्राह्मणस्य भक्त्यातस्मिन्ननुग्रहार्थं श्रीमदाचार्यैः श्रीबादरायणमूर्तिः मध्यवाटमठे स्थापितेत्यैतिह्यम्॥ तदनन्तरं स ब्राह्मणस्तद्वंश्याश्च भक्त्या श्रीबादरायणसेवां बहुकालं चक्रुः॥ इदानीं तद्वंश्यानां दौर्भाग्यात् श्रीबादरायणस्य मध्यवाटमठे वासकरणीभूत भक्तिर्विनष्टा॥ किञ्च प्रद्वेषेण श्रीबादरायण मठंप्रति न गन्तव्यं तत्प्रसादादिकं च न स्वीकर्तव्यमित्यादि समयबन्धं च ग्रामीणानां चक्रुः॥ तदा बादरायण मूर्तिर्जले प्रक्षेप्तवेत्यादि दुर्बोधनमर्चकं प्रति चक्रुः॥ तथा च श्रीबादरायणमूर्तेः मध्यवाटमठेऽवस्थानकारणीभूतायास्तत्रत्यानां भक्तेः विनष्टत्वात् तथापि तत्राऽवस्थाने जलप्रक्षेपादिमहानर्थस्य प्रसक्तत्वादस्मादपनयनमेव श्रीमदाचार्याणां सम्मतं भवेदिति श्रीमद्वृन्दावनाचार्यैः श्रीबादरायणमूर्तिरानीतेति किमनुपपन्नम्॥

वादिराजश्रीमच्चरणवंश्यैरेव कालविशेषे श्रीबादरायणमूर्तिः संरक्षणीया॥ यद्यन्यमठीयानां स्वाधीनतया विद्येत, तर्हि कालविशेषे रक्षणाय प्रतिरोधं कुर्युः॥ अतः श्रीवादिराजश्रीमच्चरणैकस्वाधीना कर्तव्येति सर्वज्ञशिरोमणि श्रीभाष्यकारीय प्रेरणानुसारेण श्रीव्यासराजस्वामिनः श्रीबादरायणमूर्तिमनयन्॥ ततः श्रीगुरुराजश्रीमच्चरणाव्यासराजनिकटं गत्वा तां मूर्तिमजहुः॥ तस्माद्रजतपीठपुरस्थानां समयबन्धानुसारेण तदेकाधीना बभूव॥ समयबन्धस्तु व्यासराजनिकटात् य एनां मूर्तिमानयिष्यति तदधीनैव तिष्ठत्विति॥ यद्येवं व्यासराजव्यापारस्य प्रयोजनं नाङ्गीक्रियते तर्हि तन्निष्प्रयोजनं प्रसज्जेत। किञ्च श्रीमदाचार्यसम्मत कार्यकर्तृत्वेनापराधिनोऽपि प्रसज्जेरन्॥ तस्मादेवमेवाङ्गीकरणीयमिति॥ एतेनैव पूर्वं केनापीयं मूर्तिस्तस्माद्देशादनानीतेति मन्दाशङ्का गर्भस्रावेणैवगता॥ तस्मात् श्रीबादरायणमूर्तेरानयनं श्रीमदाचार्यसम्मतमेवेति, एवमनङ्गीकारे श्रीकृष्णार्चकैः सर्वैः श्रीकृष्णालये प्रदेशविशेषे स्वस्वोपास्यरामादिपूजां कुर्वद्भिः तत्रैव स्थातव्यं मासद्वयपर्यन्तमेकैकेन श्रीकृष्णपूजा

कार्येत्याद्यैतिह्यसिद्ध श्रीमदाचार्यसम्प्रदायपरित्यागेन परिदृश्यमान सम्प्रदायान्तरप्रवर्तकाः पूर्वाचार्याः श्रीमदाचार्यसम्मतकार्याकर्तारः प्रसज्जेरन्॥ न चैतदङ्गीकारार्हम्॥ तत्प्रवर्तित सम्प्रदायस्याविगीतशिष्टाचारोऽयमिति सर्वैरप्यनुष्ठीयमानत्वात्॥ किञ्च देशविप्लवकाले पूर्वतनैः श्रीकृष्णमूर्तिरप्युत्खलिता देशान्तरं नीतेत्यैतिह्य सिद्धम्॥ न च तेषामप्यपराधित्वं वक्तुं युक्तम्॥ तस्मात् पूर्वनिबन्धनस्य कालदिमहिम्ना व्यत्यये प्रसक्ते मुख्यधर्माविरोधेन सम्प्रदायान्तरं प्रवर्तितव्यमिति श्रीमद्भगवत्पादीय मनोगतं जानद्भिः पूर्वाचार्यैस्तथा प्रवर्तितमिति सर्वैरप्यङ्गीकरणीयम्॥ 'तत्समं प्रकृतेऽपीति॥ तस्माद्विश्वप्रियतीर्थात्मक श्रीमद्बृन्दावनाचार्यैः कृतं मध्यवाटमठस्थितबादरायणमूर्तेरानयनं नायुक्तमिति॥ एतेनैव ब्रह्मचारिणामेव मठसंन्यासो देय इत्याचार्यनियमं त्यक्तवन्त इत्यपि यदुक्तं तदपि दत्तोत्तरम्॥ तथा पद्मनाभातीर्थप्रभृतीनां पूर्वाश्रमे गृहस्थाश्रमित्वेन सुप्रसिद्धानां मठसंन्यासः श्रीमदाचार्यैरेव दत्त इति च न गृहस्थाश्रमिणां मठसंन्यासः श्रीमदाचार्यसम्मत इति॥ किञ्च 'ब्रह्मचारी गृहस्थो वा वानप्रस्थो विरक्तिमान्' इत्यारभ्य 'उत्पन्नाग्निः पूर्वमेव हीनाग्निश्चापि संन्यासे'दित्यन्तेन संन्यासाधिकारनिरूपणेन श्रीविष्णुतीर्थीयग्रन्थेन गृहस्थाश्रमिणः संन्यासो युक्त इत्यवबुध्यते॥ तथा धर्मशास्त्रान्तरेऽपि निर्णीतं वरीवर्ति॥ विरोधिमानं(प्रमाणं) तु न दरीदृश्यते॥ तस्मात् गृहस्थाश्रमिणां संन्यासो न धर्मशास्त्रविरुद्धश्चेति॥

पुनरपि यदमन्यत श्रीमदाचार्यसम्प्रदायप्रवर्तकैः कैरप्यनाश्रितं चैत्रादिमास व्यत्ययं परिकल्प्य चातुर्मास्यादिकमन्यथयन्ति इदं च धर्मशास्त्रादिविरुद्धं इति तत् तथा न मन्तव्यम्॥ श्रीगुरुशिरोमणिश्रीमदाचार्यभ्रातृभूत श्रीमद्विष्णुतीर्थाचार्यैः स्वकृत संन्यासपद्धत्याख्यग्रन्थे चातुर्मास्यप्रकरणे चित्रादितारकाद्वन्द्वं इत्यादिना श्रीमद्बृन्दावनाचार्यैरनुष्ठीयमानचातुर्मास्यादि प्रकारस्योक्तत्वात् श्रीमदाचार्यसम्प्रदायप्रवर्तकैराश्रितोऽयं पक्षो धर्मशास्त्रसिद्धश्चेति॥

तथाहि॥ 'चित्रादितारकाद्वन्द्वं यदा पूर्णेन्दु संयुतम्। चैत्रादिमासा विज्ञेयाः पञ्चषण्णवमास्त्रिभिः॥ अदिमासे समुत्पन्ने मासांस्त्रीन् पञ्च वा वसेत्। अधिमासमृते सङ्ख्यास्याद्दतूनां सदापि च। यस्मिन् मासि न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा। संसर्पांहस्पती मासावधिमाससमौ स्मृतौ॥ द्विचन्द्रप्रभवः प्रोक्तोह्यधिमासोऽपि सूरिभिः॥ उत्तर्क्षेषु यदा पूर्णा द्वयमेवं भविष्यति॥ तदाधिमासो विज्ञेयः सर्वकालेषु गर्हितः॥' इति विष्णुतीर्थीय वाक्यस्येत्थं योजना॥ ऋतुमेकं तथा द्वौ वा सेवे देवं

समाहित' इति पूवार्धे वर्षकाले यतीनामेकत्रवास विषये ऋतुसङ्ख्या कथनेन ऋत्वङ्गतया प्रसक्तस्य मासस्य स्वरूपमाह चित्रेति॥ चित्रादिनक्षत्रद्वन्द्वमध्ये अन्यतरनक्षत्रस्य यता षोडषकलापूर्णेन्दुना सम्बन्धो भवति तदा चैत्रादयो मासा ज्ञेयाः॥ एवं पञ्चमे मासे श्रवणादि त्रिकान्यतमसम्बन्धेन षष्ठे पूर्वाभाद्रादि त्रिकान्यतमसम्बन्धेन नवमे मृगशिरादित्रिकमध्येऽन्यतमनक्षत्रस्य पूर्णेन्दुना सम्पन्धेन च श्रवणादि मासा ज्ञेया इति॥ एवमेवाश्वलायन धर्मशास्त्रे चोपाकरण प्रकरणे चन्द्रस्य कलापूर्तिकालनिरूपण पूर्वकं तत्र नक्षत्रसम्बन्ध निमित्तिका माससंज्ञेति॥ 'कलापूर्तिः भवेदिन्दोः पौर्णमास्यां' इति श्रुतिः॥ तस्यामपि तृतीयांशे यथावदिति निर्णयः। तस्मात्तस्योन्तरांशेन येनर्क्षेण समन्विता॥ तद्दक्षनामतन्मासि भवेच्चान्द्र इतीरितः' इत्यनेनाभिहितम्॥ तथा च पौर्णिमा तृतीयांशस्योत्तरभागे माससंज्ञाप्रयोजकी भूतचित्रादि नक्षत्र सम्बन्धेन चैत्रादयो मासा ज्ञेया इति भावः॥ एवं चित्रादितारकद्वन्द्वमित्यनेन मासस्वरूपं निरूप्याधिमासे कर्तव्यप्रकारमाह अधिमास इति॥ एवमधिमास प्रसक्त्या स्मरणविषयौ गर्हितत्वेन तत्वमानौ संसर्पांहस्पती मासौ तथा 'दर्शस्यान्ताः त्रयः पाद आद्यः प्रतिपदश्च यः॥ एष चन्द्रक्षयो नाम तदूर्ध्वं प्रभवः स्मृतः॥' द्विचन्द्रप्रभवो मासो ह्यधिमास इति स्मृतः' इति विद्यामाधवीयोदाहृत नारदसंहितावचनोक्तमधिमासान्तरमपि यस्मिन्मासीत्यादि सार्धश्लोकेनोक्त्वा अधिमासोऽपि सूरिभिरित्यपि शब्देन प्रकृतानभिप्रेतत्वरूपं गर्हितत्वमाह॥ इदानीं स्वाभिप्रेतमधिमासमाः॥ उक्तर्क्षेष्विति॥ मासप्रयोजकतयोक्तर्क्षेषु यदा पूर्णाद्वयं चित्तानक्षत्रे एका पौर्णिमा स्वात्यामन्या एवमादि रूपेण पूर्णाद्वयं भविष्यति॥ तदा अधिमासो विज्ञेयः॥ सच कालः सर्वकालेश्वपि गर्हित इत्यर्थः॥ अयमधिमासः पौर्णिमान्त मासपक्षे॥ पौर्णिमान्तमासस्तु चातुर्मास्यादिषु यतिबिः ग्राह्य इति सुप्रसिद्धम्॥ शिष्टाचारोऽपि तथा॥ तथा चोक्तरीत्या यदा चातुर्मास्य मध्ये अधिमासः प्राप्यते, तदा चातुर्मास्ये चैकत्रवासे विकल्पात् पञ्च वा त्रीन् वा मासान् वसेदितिभावः॥ तथा तदन्य मासेष्वप्यदिमासे प्राप्ते 'आदिमासमृते सङ्ख्यास्यात् ऋतूनां सदापि च' इत्यादुक्तत्वात् अधिमासमन्तरामासपरिगणना ज्ञेया॥

यदा तु मासद्वयप्रयोजकनक्षत्रयोरेकस्याः पौर्णिमायाः तृतीयांशे सम्बन्धस्तथा पूर्वोत्तरमासानुगुण्येन मासो निर्णयः॥ यदि मासप्रयोजकनक्षत्रमध्येऽन्यतरस्यापि पौर्णिमा तृतीयाद्यंशसम्बन्धाभावः तदा क्षयमासो ज्ञेयः॥ क्षयमासस्तु कदाचिदेव॥ ननु यदैकस्मिन्नेव वर्षे

मासद्वये, मासत्रये मासचतुष्टये मासप्रयोजक नक्षत्रस्य पूर्णिमा तृतीयांश सम्बन्धाभावः, अपि चैकस्मिन्नेव वर्षे मासद्वये, मासत्रयेऽपि चोक्त नक्षत्रे पौर्णिमाद्वयं भवति तदा मासव्यवस्थादिकं कथमिति चेदुच्यते॥

'दर्शस्यान्तास्त्रयः पादा आद्यः प्रतिपदश्च यः॥ एष चन्द्रक्षयो नाम तदूर्ध्वं प्रभवः स्मृतः॥' इत्युक्तप्रकारेण दर्शान्तिमपादत्रये चन्द्रकलाक्षयवत्, पौर्णिमान्त्यपादत्रयेपि चन्द्रकलापूर्तिरपि द्रष्टव्या॥ तत्रापि तस्यामपि तृतीयांशे यथावदित्युक्तत्वात् विशेषतः कलापूर्तिस्तृतीयांशे सामान्येन कलापूर्तिरन्यांश इति विवेको ज्ञातव्यः॥ तथा च विशेषतः कलापूर्ति कालसम्बन्धस्तु मुख्यः॥ सामान्यतः कलापूर्तिकालसम्बन्धोऽमुख्यः॥ मुख्याभावेऽमुख्यग्रहणस्य न्यायत्वात् मुख्यकालसम्बन्धाभावेष्यमुख्यकाल सम्बन्धमात्रेणाप्यसन्दिग्धपूर्वोत्तरमासानुगुण्येन मासव्यवस्थादिकं कार्यमित्यादिकमूह्यमिति॥ तथा च वृन्दावनाचार्यैः पौर्णिमान्तमास परिग्रहपूर्वकं श्रीविष्णुतीर्थाचार्यैरुक्ताधिमासादि निरीक्षणेन चातुर्मास्यादेः करणान्नशिष्टपरिगृहीतोयं पक्षः, नापि शास्त्रविरुद्धश्चेति॥

तर्हि श्रीविष्णुतीर्थाचार्यान्यपूर्वाचार्यैः कुतोऽयं पक्षो नाश्रितः? इतिचेदुच्यते॥ अत्रेदानींतनैरनुभूताचाराः पूर्वाचार्याविवक्षिता उतानुभूताचाराः॥ न आद्यः, अननुभूताचारैरयं पक्षोनाश्रित इति ज्ञातुमशक्यत्वात्॥ द्वितीये तु लोके मठसंप्रदायादि भेदेन बहुविधतया प्रवर्तमानेष्वेकादश्यादिविषयकसम्प्रदायेष्वन्यतम एव श्रीमट्टीकाकार प्रभृतिभिराश्रितः, न सर्वोपि॥ परस्परं विरुद्धत्वे नैकत्र समावेशासम्भवात्॥ तथा च शास्त्रसिद्धस्य श्रीमट्टीकाकारप्रभृतिभिराश्रितस्यैकादश्यादिविषयसम्प्रदायस्य तत्संप्रदायानुसारितया प्रसिद्धैर्मठसम्प्रदायादि भेदेन प्रवर्तमानैरनाश्रयणं कुत इत्यस्य यदुत्तरं ब्रवीषि तदेवोत्तरमिति सन्तोष्टव्यम्॥ एतेनायं पक्षः पूर्वतनैरनाश्रित इदानीन्तनैः तत्संप्रदायानुसारिभिः अनाश्रितत्वादित्येतदपि निरस्तम्॥ आधुनिकैर्बुद्धिदोषादिना पूर्वतनसम्प्रदायत्यागस्य मठसम्प्रसदायभेदेन प्रवर्तमानेषु तता वैष्णवाग्रेसर पण्डिताचार्यवंशेषु इदानीमद्वैतिमतावलम्बिषु च दृष्टत्वादित्यलं विस्तरेणेति॥ यद्यपि धर्मशास्त्रान्तरेषु मासव्यवस्था प्रकारान्तरेण कृता वर्तते॥ तथापि 'श्रुत्वा गुरोः सम्यगेवार्थमेतं वक्षम्यतः कर्मणि नात्र शङ्का' इति श्रीविष्णुतीर्थाचार्यैः प्रथमं प्रतिज्ञातत्वात् साक्षात् श्रीमदाचार्योपदिष्ट प्रकारेणोक्तोऽयं पक्ष इति न कोऽपि विरोधः शङ्कनीय

इति॥ तथा च बाधकाभावात् इन्द्रपदाधिकारि स्वप्नद्रष्टृ ब्राह्मणावतारत्वं श्रीविश्वप्रियतीर्थश्रीमच्छरणानामुक्तं युक्तमिति ॥श्रीः॥

यदुक्तं श्रीमदाचार्यसंस्थानाधीशानां देवत्वादसुरत्वमाख्याने प्रतिपाद्यत इत्येतदयुक्तमिति॥ तदपि न युज्यते॥ तेषां तावत् देवत्वं श्रीकृष्णार्चकत्वमात्रेण न निर्णेतुं शक्यम्॥ 'राज्ञां महावंशसुजन्मनां तु तद्भक्तिरप्येषु हि काचन स्यात्' इत्युक्तप्रकारेण कृष्णार्चकपदारूढत्वात् दैत्यत्वेऽपि श्री कृष्णार्चकत्वोपपत्तेः॥ न च 'आचन्द्रार्कस्य' इति देवत्वे प्रमाणमुक्तमिति वाच्यम्॥ बदरिकाश्रमादिस्थनारायणाद्यर्चकानां नारदादित्वोक्तावपीदानीमर्चकाद्वैतिब्राह्मणादीनां नारदादित्वानुपपत्तेरदृश्यतया नारदादीनामर्चकत्वं यथा सर्वैरप्यङ्गीकरणीयं तद्वदेव प्रकृतेऽपि कमलनाभादीनां दैत्यत्वेपि कृष्णार्चकानां देवत्वप्रतिपादकप्रमाणस्यादृश्यतया देवाः श्रीकृष्णमर्चयन्तीत्येतदर्थप्रतिपादकत्वमप्यङ्गीकर्तुं शक्यत एवेति न तेनैतेषां देवत्वं सिद्ध्यतीति॥ श्रीमद्भाष्याध्ययनादिकं दैत्यत्वविरोधीत्युक्तमिति चेन्न॥ भक्तिपूर्वकाध्ययनस्यैव तथात्वात्॥ प्रकृताध्ययनस्य केवलं ख्यात्याद्यर्थत्वेनोपपत्तेः॥ तदीयाऽन्तरभक्त्याद्यभावश्च, अगम्यगमन अभक्ष्यभक्षण अकार्यकरणादिना च ज्ञातुं शक्यः॥ ननु श्रीकृष्णार्चकानां कमलनाभादीनामाख्यानेऽसुरत्वं प्रतिपाद्यत इति कृत्वा श्रीकृष्णार्चकानां देवत्वप्रतिपादकपुराणवचनस्याभिप्रायान्तरवर्णनं किमर्थम्? पुराणवचनानुसारेण तेषां देवत्वमेवाङ्गीकृत्य, आख्यानस्यैव अभिप्रायान्तरवर्णनं क्रियतां नामेति चेत्, मैवम्॥ शृङ्गग्राहितया तत्तन्नामग्रहणपूर्वकं तत्तल्लक्षणकथनेन कमलनाभादीनां दैत्यत्वप्रतिपादकस्याऽऽख्यानस्य निरवकाशत्वात्॥ पुराणवचनस्य तु सामान्याकारेण कृष्णार्चकानां देवत्वप्रतिपादकस्य सावकाशत्वात्॥ सावकाशनिरवकाशयोश्च निरवकाशं बलवत्॥ निरवकाशवाक्यानुसारेण सावकाशस्यार्थान्तर कथनस्य न्याय्यत्वात् किञ्च कमलनाभादय असुरा असुरलक्षणाक्रान्तत्वादित्यनुमानसाचिव्यकाख्यानमेव बलवदिति च तदनुसारेणैव पुराणवचनस्य भावान्तरवर्णनं युक्तमिति॥ न चात्रासिद्धिः शङ्कनीया॥ श्रीमन्महाभारततात्पर्यनिर्णये प्रथमाध्याये, तथा गीतायां षोडशाध्याये च प्रतिपादितस्य श्रीहरिवायु द्वेषरूपस्य तत्प्रमाणामादि निन्दारूपस्य तथा दम्भ-दर्प-अभिमान-क्रोध-पारुष्य-प्रवृत्ति-निवृत्ति-अज्ञान-शौचाचारादिराहित्य-कामोपभोगपरमत्वादिरूपस्य च प्रकृतानुमाने हेतुभूतस्यासुरलक्षणस्य 'तीर्थं

स्वपार्श्वभूमिं च मोक्तुं नेच्छति सन्मतौ॥ त्वत्स्नानाम्बुनि गङ्गास्याच्छिलास्वास्वहमित्यदात्' इति पण्डिताचार्यैर्भावप्रकाशिकायामुक्तप्रकारेण श्रीमदाचार्याणां श्रीमन्नारायणेन बदरीकाश्रमे प्रदत्ते बादरायणप्रतीके सन्निहितश्रीहरौ तथा मुख्यवायुपदाधिकारिषु श्रीगुरुराजेषु च द्वेषयुक्तेषु तथा श्रीगुरुराज महिमप्रतिपादनमुखेन तादृशमहिमपादकश्रीहरिमहामहिमप्रतिपादनतात्पर्यक श्रीमदाख्यानिन्दनारतेषु तथा कामोपभोगार्थमामरणं परधनवनितापहाररतेष्वभक्ष्यभक्षणादि दुराचारिषु पक्षभूतेषु कमलनाभादिषु सत्त्वात्॥ तथा चैतादृशलक्षणवत्तया तद्देशीय जनानुभवविषयाणां कमलनाभादीनां श्रीमदाख्यानेऽसुरत्वं प्रतिपाद्यत इत्येतत् युक्तमित्यास्तां विस्तर इति॥ तथा च श्रीमदाख्यानस्योक्तार्थेऽनुपपत्त्यभावादुपपत्तिसद्भावाच्चोपपन्नं प्राक्तनं व्याख्यानमिति ॥ श्रीः॥

तस्मात् श्रीगुरुराजैः 'वागीशतीर्थमुनिवर्यभवद्दयाम्बुयोगेन पावय मनोगृहमन्वहं मे॥ नागेन्द्रतल्पमधिरोपय तत्पदाब्जरागेण रञ्जय कलिं जय तद्विविक्षुम्॥' इत्यादि तीर्थप्रबन्धादिषु तद्विविक्षुमित्यनेन प्रवेष्टुमिच्छामात्रप्रतिपादनमुखेन स्वमनसि कलिप्रवेशाभावोक्त्यादिना सूचितस्य स्वऋजुगणस्थत्वादेर्विशदीकरणार्थं तैरेवकृतश्रीमद्वृन्दावनाख्यानार्थे बाधकाभावात् साधक सद्भावाच्च तदुक्तप्रकारेण श्रीगुरुराज ऋजुगणस्थत्वादिमहामहिमानं ज्ञात्वा 'स्वप्रीत्यनुसृतौ प्रीतिर्लोकेप्यद्यैवदृश्यत' इत्युक्तत्वात् श्रीगुरुराजप्रीत्यास्पदेशु श्रीमद्वृन्दावनाचार्यप्रभृतिषु च भक्तिपूर्वकं तदुपदिष्टप्रकारेण श्रीगुरुराजान्तर्यामितया श्रीभगवदुपासने कृते श्रीगुरुराजानुग्रहद्वारा श्रीहरिप्रसादेनाखिलपुरुषार्थो भवतीत्युक्तमुपपन्नमिति स्थितमितिसर्वमतिमङ्गलम्॥

श्रीवादिराजगुणरत्नगणप्रहृष्टवाख्यानभानुमति सत्यपि शुद्धबुद्धिः।
दुष्टोक्तिक्लिष्टनयनो न च दृष्टिमेति तद्दृष्टिपुष्टिकरणार्थमयं श्रमो मे॥1॥

शब्दाब्दिमार्गं नच वेद्मि सम्यग्वर्तेत सन्ध्यादिषु व्यत्ययोऽत्र
दृष्ट्वा तु तं सूरयो नैव हास्यं कुर्वन्तु यस्माद्गुणलुब्धचित्ताः॥2॥

अच्युतप्रेक्षवंश्यः श्रीभीमसेतुमठे स्थितः।
रघुप्रवीरनामाऽहं गुरुराजप्रसादतः॥3॥

श्रीमद्वृन्दानाख्यानप्रामाण्यस्य प्रबोधनम्।
अकार्षं तेन तुष्टोस्तु रामो हयमुखात्मकः॥4॥

इति श्रीमद्वृन्तावनाख्यान प्रामाण्यप्रबोधनम् श्रीरघुवीरयतिकृतं समाप्तम्॥

श्रीमद्वादिराजगुर्वन्तर्गत हयवदनः प्रीयताम्॥ श्रीकृष्णार्पणमस्तु॥

## श्रीहरिगुरुस्तोत्रकुसुमाञ्जलि

## श्रीभावीसमीरवादिराजयतिकृत हयग्रीवसम्पदास्तोत्रम्

हयग्रीव हयग्रीव हयग्रीवेति वादिनम्।
नरं मुञ्चन्ति पापानि दरिद्रमिवयोषितः॥1॥

हयग्रीव हयग्रीव हयग्रीवेति यो वदेत्।
तस्य निस्सरते वाणी जह्नुकन्याप्रवाहवत्॥2॥

हयग्रीव हयग्रीव हयग्रीवेति यो ध्वनिः।
विशोभते च वैकुण्ठकवाटोद्घाटन क्षमः॥3॥

श्लोकत्रयमिदं पुण्यं हयग्रीवपदाङ्कितम्।
वादिराजयतिप्रोक्तं पठतां सम्पदां प्रदम्॥4॥